
# वेदान्तः मिमांसा च

**Course Code: M23SN10DC**

Discipline Core Course
Postgraduate Programme in
Sanskrit Language and Literature
Self Learning Material




**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# वेदान्तः मीमांसा च

Course Code: M23SN10DC

Semester - III

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

# SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# वेदान्तः मीमांसा च

Course Code: M23SN10DC
Semester- III
Discipline Core Course
MA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY


**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair



**Development of the Content**

Dr. Vijarajan K. U.

**Review and Edit**

Dr. K. K. Sundaresan

**Linguistics**

Dr. K. K. Sundaresan

**Scrutiny**

Dr. Vijayarajan K.U.
Dr. Jothilekshmi M.
Dr. Vijayarajan K.U.
Chitra Baskar
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition:**
January 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-986822-4-6

9 788198 682246



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.



www.sgou.ac.in


YouTube

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-01-2025

# Contents


**Block 1 - Vedantasara - Text, Author, Concepts** 1

**Unit 1 -** अध्यारोपापवादन्यायः 2

**Unit 2 -** अनुबन्धचतुष्टयम् 12

**Unit 3 -** अज्ञानसृष्टिक्रमः 20

**Unit 4 -** पञ्चीकरणम् 35

**Block 2 - Vedantasara - Concepts** 45

**Unit 1 -** पुत्रस्य आत्मत्वनिरासः 46

**Unit 2 -** महावाक्यनिरूपणम् 56

**Unit 3 -** षड्विधतात्पर्यनिर्णायकलिङ्गानि 67

**Unit 4 -** समाधिः जीवन्मुक्तः च 74

**Block 3 - Arthasangraha - Text, Author, Concepts** 89

**Unit 1 -** अर्थसंग्रहस्य सामान्यपरिचयः 90

**Unit 2 -** धर्मलक्षणम् 100

**Unit 3 -** भावना 106

**Unit 4 -** चतुर्विधविधयः सोदाहरणम् 116

**Block 4 - Arthasangraha - Concepts** 124

**Unit 1 -** मन्त्रः 125

**Unit 2 -** नामधेयः 130

**Unit 3 -** निषेधः 136

**Unit 4 -** अर्थवादः 141

**Model Question Paper (SET – A)** 146

**Model Question Paper (SET – B)** 148


SGOU

# Vedantasara - Text, Author, Concepts

# BLOCK 1

SGOU

UNIT 1

# अध्यारोपापवादन्यायः

## Learning Outcomes

- वेदान्ततत्त्वानां अवगमनम्।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण अध्यारोपापवातत्त्वानां  अवबोधनम्।

## Background

वेदे प्रतिपादितविषयक्रमानुसारं चत्वारः भागाः सन्ति। वेदानां प्रथम विभागः संहिता इति कथ्यते। इन्द्रः, अग्निः, वायुः, विष्णुः, इत्यादि देवतानां प्रीत्यर्थं गायमानाः स्तुतयः एव संहितायाम् अन्तर्भवन्ति। मन्त्राणां समूहः एव सूक्तयः। वेदस्य द्वितीयविभागे ब्राह्मणे यज्ञविधयः एव प्रतिपादिताः। तृतीयः विभागः आरण्यकम् इति रूपेण ज्ञायते। अरण्ये अनूच्यमानत्वात् आरण्यकम् इति शङ्करः बृहदारण्यकभाष्ये वदति। वेदानां अन्तिमः भागः भवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धा। वेदान्ततत्त्वानां संग्रहरूपेण वर्तमानः प्रकरणग्रन्थः भवति श्रीमद् सदानन्दविरचितवेदान्तसारः। अस्मात् ग्रन्थात् सरलरीत्या अद्वैततत्त्वानि ज्ञातुं शक्यते।

## Keywords

अध्यारोपः, वस्तुनि ,अपवादः, अज्ञानम्, वस्तुमात्रत्वम्, सच्चिदानन्दं ब्रह्म, त्रिगुणात्मकं, विवर्तः, अध्यासः, परिणामः।

## Discussion

वेदानाम् अन्तिमः भागः भवति उपनिषत् ।

वेदानां अन्तिमः भागः भवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धा। उपनिषत्सु मुख्यत्वेन वर्णिताः विषयाः समासतः सन्ति- किम् ब्रह्म, कः ईश्वरः, जीवात्मनः स्वरूपम्, जीवात्मनः लक्ष्यम्, जीवो ब्रह्मणो भिन्नोऽभिन्नो वा,कथं च भिन्नत्वम् अभिन्नत्वम् वा, सृष्टेः मूलरूपं किम्, कथं जगतः प्रादुर्भावः, कथं जगतः प्रलयः, कथं मोक्षावाप्तिः, कानि च मोक्षस्य साधनानि, ब्रह्मसाक्षात्कारस्य के लाभाः इत्यादयः। तत्र कठोपनिषदि उक्तम्-

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**

**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः।।**

उपनिषदः एव वेदान्तरूपेण ज्ञायन्ते। वेदान्त-दर्शनस्य अनेके अवान्तरवादाःसन्ति। तेषु अद्वैतम्, विशिष्टाद्वैतम्, द्वैतम्, द्वैताद्वैतम् इत्यादीनि प्रमुखानि सन्ति।

वेदस्य अन्तिमः भागः उपनिषद् रूपेण ज्ञायते।उपनिषदः अध्यात्मज्ञानस्य मूलम् इति कथ्यते। उपनिपूर्वयोः सदेस्तदर्थत्वात् (सदिरप्रतेः इति पाणिनीयसूत्रेण सकारस्य षकारः) तादर्थ्याद्ग्रन्थोऽप्युपनिषदुच्यते। वेदान्तो नाम उपनिषत्प्रमाणम् तदुपकारिणी शारीरकसूत्रादीनि इति वेदान्तसाराख्ये ग्रन्थे उक्तम्। उपनिषद् शब्दस्तु उप-नि इति

द्वयोपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्यये कृते निष्पद्यते। सदिरप्रतेः इति अष्टाध्यायी। अत्र सद् धातोः त्रयः अर्थाः सन्ति- विशरणम्-नाशः, गतिः- ज्ञानम्, अवसादनम्- शैथिल्यम्। उपनिषदाम् अध्ययनेन संसारस्य बीजस्वरूपायाः अविद्यायाः नाशं भवति, एवञ्च संसारमूलं बन्धनम् अविद्यारूपं शिथिलयति दुःखानि च विनश्यन्ति। परमात्मविषया उपनिषदः इति केनभाष्ये कथयति। अत एव शङ्कराचार्यः अविद्यानाशं दुःखनिरोधं ब्रह्मप्राप्तिश्च अर्थत्रयं गृहीत्वा उपनिषदः ब्रह्मविद्यायाः द्योतकरूपाः ग्रन्थाः मन्यते। वेदे बह्व्यः उपनिषदः सन्ति । तासु ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीय-ऐतरेय-बृहदारण्य-छान्दोग्यानां च दशोपनिषदां प्राधान्यमस्ति।

सद् धातोः विशरणम्, गतिः, अवसादनम् इति त्रयः अर्थाः सन्ति।

वेदान्तदर्शनं सर्वदर्शनमूर्धन्यम्। वेदस्यान्तिमसिद्धान्तस्य निरूपकत्वादुपनिषदामिव अस्यापि 'वेदान्त' इत्येषा संज्ञान्वर्था। बारदायणव्यासप्रणीतत्वाद् अस्य दर्शनस्य रचना महाभारतात् प्रागेव बभूवेति निश्चीयते। उपनिषत्, ब्रह्मसूत्रम्, भगवद्गीता च वेदान्तदर्शनस्य प्रामाणिकग्रन्थाः। एते प्रस्थानत्रयरूपेण ज्ञायन्ते। वेदान्तशास्त्रावगमनाय अनेके प्रकरणग्रन्थाः अपि सन्ति। तेषु श्रीमद् सदानन्दविरचितवेदान्तसारः अतीव आधिकारिकग्रन्थः वर्तते। तत्र वेदान्ततत्त्वानि सम्यक् रीत्या सुघटितानि।

**अयमधिकारी जननमरणादिसंसारानलसन्तप्तो प्रदीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति "समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादि श्रुतेः । स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति "तस्मै स विद्वानुपसन्नाय प्राह" इत्यदिश्रुतेः ॥**

शिष्यस्य गुरोश्च कर्तव्य-प्रदर्शनम्

व्याख्या - शास्त्रारम्भे निमित्तस्य अधिकार्यादिनिरूपणस्य अनन्तरं शास्त्रारम्भः प्रस्तौति । साधनचतुष्टयसम्पन्नो विज्ञातविषयादिमानात्मयाथात्म्यजिज्ञासुः

बुद्धिसन्निहितोऽधिकारी गुरुमुपसर्पति । निदाघमध्याह्नार्कमरीचिसन्तप्तमस्तकः सन्तापनिवृत्तिकामः यथा शीतलं जलराशिमनुसरति, तथा संसारतापत्रयेण दन्दह्यमानस्तन्निवृत्तिकामः स्व-स्वरूप- जिज्ञासुः संसारनिवर्तकं श्रोत्रियं वेदवेदाङ्गपारगं ब्रह्मनिष्ठं औपनिषद-ब्रह्मात्मविज्ञानपरिपूर्णकरतलस्थितामलकवत् स्वप्रकाशात्मस्व-रूपसमर्पकगुरुमुपसृत्य गुरोः समीपं गत्वा तम् अनुसरति मनोवाक्कायकर्मभिः सेवते । सः पूर्वोक्तो गुरुः एनं शिष्यमुपदिशति । परमरहस्यमपि ब्रह्मस्वरूपं परमकृपया प्रपन्न जनक्लेशदर्शनजातकरुणया तन्मतिप्रकाशनप्रवृत्त्या वा उपदिशति। ननु अखण्डस्य ब्रह्मस्वरूपस्य अगोचरत्वेन उपदेष्टुमशक्यत्वात् गुरुः कथं तदुपदिशति ? इत्यत आह- अध्यारोपेति । अखण्डब्रह्मस्वरूपस्य अगोचरत्वाद् विधिमुखेन उपदेष्टुमशक्यत्वेऽपि "नेह नानास्ति किञ्चन" (बृहदा० उ० ४।४।१९) इत्यादिश्रुतिमनुसृत्य अविद्यारोपितमिथ्यानाना पदार्थनिषेध ( पदार्थाऽपवाद) मुखेन उपलक्षितमखण्डचैतन्यमेव पुनः "सत्यं ज्ञानमनन्तं ब्रह्म" - ( तैत्ति० उ० २।१।५) इत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनापि उपदिशति ।

अध्यारोपापवादन्यायेन - नीयते प्राप्यते-विवक्षितार्थसिद्धिः अनेन इति न्यायः प्रणाली, रीतिः, पद्धतिः । अध्यारोपः अपवादः च। वस्तुनि अवस्तु आरोपः अध्यारोपः। रज्जौ सर्पारोपवत्। अपवादो नाम वस्तुनः वस्तुमात्रत्वम्। यथा शुक्तौ रजतभ्रमनिषेधेन शुक्तिमात्रत्वम् । एवं अध्यारोपापवादन्यायेन गुरुः शिष्याय ब्रह्मोपदेशं ददाति।

वस्तूनि अवस्त्वारोपः अध्यारोपः

वेदान्तसारे अध्यारोपस्य लक्षणं वदति -

**असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः । वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म । अज्ञानादि-सकलजडसमूहोऽवस्तु । अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ**

**इत्याद्यनुभवात् “देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादि श्रुतेश्च ॥ १० ॥**

अध्यारोपं लौकिकदृष्टान्तेन बोधयति-असर्पभूतायामिति ।

व्यावहारिकवस्तुरूपेण सम्मतायां रज्जौ अवस्तुरूपसर्पारोपः, अर्थात् रज्ज्ववछिन्नचैतन्यस्था अविद्या सर्वज्ञानाभासाकरेण परिणममाना सर्पाकारेण विवर्तते,अयमेव विवर्तः अध्यास इत्युच्यते । स विवर्तः रज्ज्ववच्छिन्नचैतन्यनिष्ठाऽविद्योपादानकत्वेन 'नायं सर्पः किन्तु रज्जु' इति विशेषदर्शनोत्तरकाले अधिष्ठानरज्जुसाक्षात्कारेण रज्जुविषयकाज्ञाननिवृत्तौ निवर्तते । अर्थात् सर्पभ्रान्तिः (रज्जुविवर्तः) निवर्तते । किन्तु अधिष्ठानसाक्षात्कारेण भ्रमो निवर्तते ।

अर्थात् अतस्मिन् तद्बुद्धिः आरोपः अध्यारोपो वा । कस्मिंश्चिद् वस्तुनि तत्समानस्य अवस्तुनो भ्रम इत्यर्थः । किन्तु अधिष्ठानसाक्षात्कारेण भ्रमो निवर्तते । तथैत्र सच्चिदानन्दाद्वये वस्तुभूते ब्रह्मणि अज्ञानतत्कार्याऽखिलजडसमूहस्यावस्तुनः अध्यारोपो भवति, किन्तु अधिष्ठानभूतस्य ब्रह्मणः साक्षात्कारे सति तत्र भासमानो जगद्भ्रमो निवर्तते । तत्र कालत्रयेऽपि अविनाशी आत्मा (ब्रह्म) एव वस्तुशब्दार्थः । अवस्तुनः स्वरूपमाह-अज्ञानादिति । अज्ञानतज्जन्याकाशादिप्रपञ्चस्य मिथ्यात्व-दृश्यत्व-सावयवत्व-विकारित्व-सापेक्ष सिद्धिकत्वेत्या-दिबहुभिर्हेतुभिः अवस्तुत्वं सिद्ध्यति । एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्य स्वरूपमुच्यते-अज्ञानं तु इति । किमिदमज्ञानं सद्रूपमसद्रूपं वा? तत् 'सद्रूप' मित्ति वक्तुं न शक्यते। यदि सद्रूपं चेत् तर्हि ब्रह्मसाक्षात्कारानन्तरं तस्य बाधो न स्यात्, किन्तु जाते ब्रह्मसाक्षात्कारे तस्य बाधो भवति । अतः अज्ञानं न सत् । नापि तत् असदिति वक्तुं शक्यते । यदि तत् असत् चेत् तर्हि तस्य प्रतीतिर्नाभविष्यत्, किन्तु तस्य प्रतीतिर्भवति । अतः कथं तस्य असत्त्वं वक्तुं शक्यम् । यदि अज्ञानमसत् स्यात्

अविनाशी आत्मा एव वस्तुशब्दार्थः

तर्हि तस्य जडपदार्थाऽऽभासकारणत्वं नोपपद्यत । अतः सत्त्वेन असत्त्वेन ज्ञान तन्निवारयितुं शक्यते इत्यत आह अनिर्वचनीयमिति ।

ननु अज्ञानस्य अनिर्वचनीयत्वे सर्वथा ज्ञातुमशक्यत्वात् तदभावप्रसङ्गमाशङ्क्याह-त्रिगुणात्मकमिति । "अजामेकां" - (श्वेता० उ० ४।५) इत्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मक-त्वप्रतिपादनात् अज्ञानस्य त्रिगुणात्मकत्वम् । ननु अजस्य अज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरूपेण विवर्तस्य सत्यवद्भासमानत्वेन संसारस्य अनिवृत्तिमाशङ्कयाह-ज्ञानविरोधीति। एतादृशमपि अज्ञानमात्मसाक्षात्कारेण (ब्रह्मज्ञानेन ) निवर्तते ।

ज्ञानाभाव एव अज्ञानमिति तार्किकमतं निराकरोति - भावरूपमिति । अज्ञानस्य त्रिगुणात्मकत्वे भावरूपत्वेऽपि 'इदमित्थमेव' इति पिण्डीकृत्य दर्शयितुं न शक्यत इत्याह-यत्किञ्चिदिति । अनिर्वचनीयस्य अनादिभावरूपस्य अज्ञानस्य सद्भावे अनुभवमेव उदाहृत्य दर्शयति-अहमज्ञ इति । 'अहमज्ञः', 'मामहं न जानामि' इति अपरोक्षावभास एव प्रमाणम् । श्रुतिरपि एतदेव समर्थयति-देवात्मशक्तिमिति ॥ १० ॥

## अपवादः

**अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम्--**

**"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।**

**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः" इति ॥**

वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्

**तथा हि- एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतं भूरादिचतर्दशभुवनान्यतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं**

**चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्यु-त्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति । एतदज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ।। २५ ।।**

वस्तुनः यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः

व्याख्या - मिथ्याप्रपञ्चस्य सामान्यतः विशेषतश्च आत्मवस्तुनि अध्यारोपप्रकारं सविस्तरमभिधाय अधुना तदपवादप्रकारं निरूपयितुमारभते- अपवाद इति । कार्यस्य कारणमात्राव-शेषणमपवादः । असङ्गोदासीने परमात्मवस्तुनि तद्विवर्तभूताऽज्ञानादिमिथ्याप्रपञ्चस्य चैतन्यवस्तुमात्रावशेषतया अवनमेव अपवादः । तत्र लौकिकं दृष्टान्तमाह-रज्जुविवर्तस्येति । तथा हि- रज्जौ सर्पस्य, शुक्तौ रजतस्य वा प्रतीतौ अर्थात् रज्जुस्वरूपाऽपरित्यागेन सर्पाकारेण, शुक्तिस्वरूपापरित्यागेन रजताकारेण भासमानस्य वा रज्जुविवर्तस्य शुक्तिविवर्तस्य वा अपवादः विनाशः, अर्थात् अधिष्ठानभूतरज्जुमात्रतया शुक्तिमात्रतया वा यथा अवस्थानं भवति, तथा चिद्विवर्तस्य अज्ञानादिप्रपञ्चस्य अपवादो (नाशो) नाम चिन्मात्रत्वेन अवस्थानमित्यर्थः । यथास्वरूपेण (यथार्थरूपेण) अवस्थितस्य वस्तुनः अन्यथाभावो द्विधा भवति । परिणामभावो विवर्तभावश्चेति । तत्र परिणामभावो नाम वस्तुनो यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिः । यथा दुग्धमेव स्व-स्वरूपं परित्यज्य दध्याकारेण परिणमते । विवर्तभावस्तु वस्तुनः स्व-स्वरूपाऽपरित्यागेन स्वरूपान्तरेण मिथ्या प्रतीतिः यथा रज्जुः स्वस्वरूपाऽपरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते । अत्र वेदान्तसिद्धान्ते ब्रह्मणि प्रपञ्चमानस्य परिणामभावो न स्वीक्रियते दुग्धादिवत् ब्रह्मणो विकारित्वप्रसंगात् अनित्यत्वादिदोषापत्तेः । विवर्तभावाङ्गीकारे तु नायं दोषः, ब्रह्मणि प्रपञ्चभानस्य मिथ्यात्वेन विकारित्वाभावात् । तथा

चोक्तम्-"अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः ।' तस्मात् चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थानमेवापवादः ।। २५ ।।

वस्तुनः स्वस्वरूपाऽपरित्यागेन स्वरूपान्तरेण मिथ्या प्रतीतिः।

परिणामभावो नाम कस्यापि वस्तुनः स्वीयं वास्तविकं रूपं परित्यज्य स्वरूपान्तरग्रहणम् । यथा- दुग्धस्य दधिरूपः परिणामः । विवर्तभावो नाम - कस्यापि वस्तुनः स्वीयं वास्तविकं रूपमपरित्यज्यैव अन्यवस्तुरूपेण मिथ्या प्रतीतिः । यथा रज्जौ सर्पस्य मिथ्या प्रतीतिः, शुक्तौ रजतस्य मिथ्या प्रतीतिर्वा ।

तथा चोक्तम् - सत्त्वतोऽन्यथा प्रथा इत्यत्र ।

अन्ते चैतन्यमेव अवशिष्यते।

समग्रस्य सांसारिकप्रपन्नस्य स्व-स्वकारणे लयप्रकारः यदाऽवगतो भवति तदा पूर्वोक्तमिथ्याप्रतीतिर्विनश्यति, ब्रह्ममात्रं चावशिष्टं भवति । अयं लयप्रकारः तथाहीत्यादिग्रन्थेन प्रदश्यते एतच्चतुर्विधसकलस्थूलशरीरजातं सुखदुःखादि-भोगायतनम्, अन्नपानादिकं तद्भोग्यरूपं, भूरादिचतुर्दशलोकहितं भुवनत्रयं तदाश्रयभूतं, तदाधारभूतमेतत्सर्वं ब्रह्माण्डञ्च स्वकारणभूतेषु पञ्चीकृतमहाभूतेषु विलीयते । तदनन्तरं शब्दादिविषयसहितानि पञ्चीकृतमहाभूतानि सप्तदशावयवं सर्वं सूक्ष्मशरीञ्च स्वकारणभूतेषु अपञ्चीकृतमहाभूतेषु विलीयन्ते । ततः सत्त्वादिगुणसहितानि तानि सर्वाणि अपञ्चीकृतमहाभूतानि स्वकारणभूते अज्ञानोपहितचैतन्ये विलीयन्ते । तच्चाज्ञानं तदुपहितं सर्वज्ञत्वादिगुणविशिष्टं चैतन्यमीश्वरादि च एतत्स्वाधारभूते अनुपहिते तुरीयचैतन्ये ब्रह्मणि विलीयते । एवं सर्वं स्वस्मिन् समावेश्य अन्ते चैतन्यमेवात्र अवशिष्यते । एवञ्च स्थूल सूक्ष्म-कारण- प्रपञ्चानामुत्पत्तिवैपरीत्येन तत्तत्कारणरूपेण अवस्थानमेव अपवादः ।

## Summarised Overview

अस्मिन् एकके अद्वैतवेदान्तस्य ब्रह्मतत्त्वं अध्यारोपापवादन्यायेन विशदीकरोति। असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः । वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म। अज्ञानादिसकलजडसमूहोऽवस्तु । अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुमवात् "देवात्मशक्तिं स्वगुणैनिगूढाम्"।अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् ।अविद्यावादः अद्वैतवेदान्तस्य प्रमुखः सिद्धान्तः। एवं अध्यारोपापवादन्यायेन ब्रह्मणः ज्ञानं लभते।

## Assignments

1.वेदान्तो नाम किम् ?
2.वेदान्तसारे उक्तस्य अध्यारोपस्य स्वरूपं प्रदर्शयत।
3.अज्ञानलक्षणं सभेदं विशदयत।
4.अपवादं विशदयत।

## Suggested Readings

1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

## References


1. *Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 2

# अनुबन्धचतुष्टयम्

## Learning Outcomes

- वेदान्ततत्त्वानां अवगमनम्।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण अनुबन्धचतुष्टयस्य अवबोधनम्।

## Background

वेदानां अन्तिमः भागः भवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धा।वेदान्तत्त्वानां संग्रहः भवति सदानन्दविरचितवेदान्तसारः। अस्मिन् प्रकरणग्रन्थे अनुबन्धचतुष्टयम्, अज्ञानम्, पञ्चीकरणम्, सूक्ष्मशरीरम्, अध्यारोपं, अपवादं, महावाक्यार्थनिरूपणम्, समाधिः, जीवन्मुक्तस्वरूपं इत्यादिविषयान् साधारणजनान् अपि ललितरूपेण अवगन्तुं शक्यते। अस्मिन् एकके अनुबन्धचतुष्टयं विशदरूपेण प्रतिपादितं अस्ति। तत् पठामः।

## Keywords

अनुबन्धचतुष्टयं, अधिकारी, विषयः, संबन्धः, प्रयोजनं, साधनचतुष्टयं, प्रमाता, नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षत्वं, जीवब्रह्मैक्यं, बोध्यबोधकभावः, मोक्षप्राप्तिः।

# Discussion

वेदान्तसारे प्रथमं मङ्गलश्लोकानन्तरम् अनुबन्धचतुष्टयं प्रतिपादितमस्ति । अनुबन्धप्रतिपादनार्थं कारणं वाचस्पत्यमित्यस्मिन् ग्रन्थे स्पष्टीकृतं यत्-

**ज्ञातार्थज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।**

**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ।।**

कुमारिलभट्टेनाप्युक्तम्-

**सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।**

**यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ।।**

अनुबन्धचतुष्टयम्-

अनुबध्नाति अध्येतारमिति अनुबन्धानि । केन पठितव्यम् ? विषयः कः? विषयग्रन्थयोस्सम्बन्धः कः ? प्रयोजनञ्च किमिति ? अतः अनुबन्धो नाम अधिकारिविषयसम्बन्धप्रयोजनानि ।

**अधिकारी-**वेदान्तशास्त्राध्ययनात् यद् ज्ञानं फलं वा लभ्यते तस्योपभोक्ता एव अधिकारी इत्युच्यते । एतादृशस्य ज्ञानस्योपलब्ध्यर्थं अधिकारिसमीपे केचिद्गुणा अपेक्षिता। अतः तस्य लक्षणं तदनुरूपमेव लक्षितम् । ।वेदान्तसारे उक्तम् -

अनुबन्धचतुष्टयम्- अधिकारी विषयः संबन्धः प्रयोजनम् च

**अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ।। ४ ।।**

नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव वेदान्ताधिकारीति संलक्ष्यते । अर्थात् अस्यायं तावदभिप्रायः यद् वेदान्तशास्त्रस्याधिकारी स एव भवितुमर्हति, यः खलु अस्मिन्

जन्मनि जन्मान्तरे वा ऋग्यजुः सामाथर्वाख्यानां वेदानां, छन्दः-कल्प-व्याकरण-ज्योतिष-निरुक्त-शिक्षादीनां वेदाङ्गानां विधिपूर्वकमध्ययनं करोति, तेनाध्ययनेन यः कृत्याकृत्यप्रवृत्तिज्ञानं प्राप्नोति, तदाधारेण काम्यकर्मणामनुष्ठानं निषिद्धकर्मणां च वर्जनं येन क्रियते, नित्य-नैमित्तिक-प्रायश्चित्तोपासनादीनां कर्मणानुष्ठानात् यस्य चित्तशुद्धिर्भवति, तथा च यः साधनचतुष्टयसम्पन्नोऽस्ति पुनश्च यः लौकिक-वैदिकव्यवहारस्य पूर्णज्ञाता (प्रमाता) इत्युच्यते । अत्र चत्वारः विन्दवः अधिकारिणः कृते भवितुमर्हन्ति-

(क) वेद-वेदाङ्गानां इह जन्मनि जन्मान्तरे वा विधिपूर्वकमध्ययनं प्रथमः। यथोक्तम्-" ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।" (व्या० भाष्य०)

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।

(ख)काम्यनिषिद्धकर्मपरित्यागपूर्वकं नित्यनैमित्तिकप्रायश्चित्तोपसनानुष्ठानेन विधूतसकलकल्मषस्वान्तः (कर्मानुष्ठानम्) द्वितीयः। कर्म द्विविधं भवति- 1. त्याज्यकर्म, 2. अनुष्ठेयकर्म चेति। तत्र त्याजकर्म द्विविधः- 1. काम्यकर्म, 2. निषिद्धकर्म च । अनुष्ठेयकर्म चतुर्विधम्- 1. नित्यकर्म, 2. नैमित्तिककर्म, 3. प्रायश्चित्तकर्म, 4. उपासनाकर्म च।

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाधिनिष्टसाधनानि ब्राह्मणहननादीनि। नित्यान्यकरणे प्रत्यवायवाधनानि सन्ध्यावन्दनादीनि । नैमित्तिकानि पुत्र-जन्माद्यनुबन्धीनि जातेष्ट्यादीनि । प्रायश्चित्तानि पापक्षय-साधनानि चान्द्रायणादीनि । उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ।

(ग) नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षत्वञ्चैतत्साधनचतुष्टयसम्पन्नता तृतीयः ।उक्तं च वेदान्तसारे-

साधनचतुष्टयम्

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षुत्वानि । नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं बस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः । शमादयस्तु शमदमोपरतितितिक्षासमाधाश्रद्धाख्याः । शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः । दमो बाह्यन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् । निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता । निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा । मुमुक्षुत्वं मोक्षेच्छा । एवभूतः प्रमाताधिकारी 'शान्तो दान्त' इत्यादिश्रुतेः । उक्तं च-

**"प्रशान्तचित्ताय जितेन्द्रियाय च।**

**ग्रहणदोषाय यथोक्तकारिणे ।**

**गुणान्वितायानुगताय सर्वदा**

**प्रदेयमेतत्सततं मुमुक्षव" इति ॥७॥**

इहामुत्रार्थफलभोग विरागः।

ऐहिकानामिति । इह लोके भवा ऐहिकाः प्रतिपन्नशरीरसम्बन्धिनः स्रक्चन्दनव नितागृहक्षेम पशुभृत्यादि-विषयजन्यसुखरूपा भोगाः । कृषिसेवाप्रतिग्रहादिकर्मजन्या अनित्या यथा दृष्टाः, एवमामुष्मिका अपि अमृतादिविषयसेवाजन्या यागादिकर्मजन्यत्वादनित्या भवितुमर्हन्तीति निश्चित्य तेभ्यो नितरां छर्दितान्नवत् जुगुप्सा, इहामुत्रार्थफलभोगविरागः ।

शमादीन् विभजते- शमादय इति । तत्र शमं लक्षयति - शमस्तावदिति । यथा तीव्रतयां बुभुक्षायां भोजनादन्यो व्यापारो मनसे न रोचते, भोजने विलम्बं च न सहते, तथा

शीतोष्णादेः द्वन्द्वस्य यत्सहनं सा तितिक्षा।

स्रक्चन्दनादिविषयेषु अत्यन्तमरुचिः, तत्त्वज्ञानसाधनेषु श्रवणमननादिषु चात्यन्तमभिरुचिर्जायते । तदा पूर्ववासनाबलाच्छ्रवणादिसाधनेभ्य उड्डीय स्रक्चन्दनादिविषयेषु गम्यमानं मनो येन अन्तःकरणवृत्तिविशेषेण निगृह्यते सा वृत्तिविशेषः शमः। दमस्य लक्षणमाह-दम इति । ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्त्यन्ते स दम इत्यर्थः तद्व्यतिरिक्तेत्यत्र श्रवणादिस्तच्छब्दार्थः। निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य श्रवणादिव्यतिरिक्तविषयेभ्य उपरमणं पुनर्विषयप्रवृत्त्यनुत्साहकरणेन स्थिरीकरणमुपरतिः । अर्थात् बाह्यान्तरिन्द्रियाणां 'श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छन्ति तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सा उपरतिरित्यर्थः । ननु शमदमयोर्लक्षणाभ्यामिदमुपरतिलक्षणं सकीर्णम् प्रतिभाति, बहिर्प्रवृत्तेन्द्रियव्यापार निरोधात्मकस्य लक्षणार्थस्य तुल्यत्वादित्यपरितोषात् प्रकारान्तरेणोपरति लक्षयति-अथवा विहितानामिति।विहितानामवश्यकर्तव्यतया चोदितानां संध्यावन्दनाग्निहोत्रादीनां नित्यादिकर्मणां विधिना चतुर्याश्रमस्वीकारेण परित्यागः उपरतिः । नाहं कर्ता इत्यवस्थानमुपरतिरित्यर्थः । शमादिवत् सन्यासोऽपि आत्मज्ञानाऽन्तरङ्गत्वादवश्यं मुमुक्षुणा अनुष्ठेयः । तितिक्षायाः लक्षणमाह - तितिक्षेति । शरीरधर्मस्य शीतोष्णादेः तज्जन्यसुखदुःखादेश्च शरीरस्य त्यक्तुमशक्यत्वात् स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णादेरत्यन्ताभावादिति विवेकदीपेन मिथ्याभूतस्य शीतोष्णादेः द्वन्द्वस्य यत्सहनं सा तितिक्षा ।

शीतोष्णादीत्यादिपदान्मानापमानलाभालाभशोकहर्षादीनां संग्रहः । समाधानलक्षणमाह - निगृहीतस्येति। शब्दादिविपयेभ्यो निगृहीतस्य अन्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु विषयेषु समाधिः नैरन्तर्येण तच्चिन्तनं समाधानम् । समाधिः

ऐकाग्र्यं तत्परत्वमिति यावत्। इदमित्थमेव नान्यथेति गुरुपदिष्ट वेदान्तवाक्येषु निश्चिता बुद्धिः सा श्रद्धा । अन्तिमं साधनं लक्षयति - मुमुक्षुत्वमिति । मोक्षो नाम विद्यानिरस्ताऽविद्यातत्कार्यस्य ब्रह्मात्मनावस्थानम्। ननु "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता। अथ मर्त्योऽमृतो भवति।" इति श्रुतेः सर्वकामविमुक्तस्य मोक्षाधिकारात् कथमिच्छाया अधिकारिविशेषणत्वमिति चेत्, नायं दोषः । पूर्वोक्तसकलविशेषणविशिष्टः प्रमाता अधिकारी।

मोक्षो नाम विद्यानिरस्ताऽविद्या तत्कार्यस्य ब्रह्मात्मनावस्थानम्

(घ)प्रमातृत्वम्-एभिर्गुणैर्युक्त एव प्रमाता वेदान्ताध्ययनाधिकारीति निर्णीयते, तद्यथा संकलितमीश्वरकृष्णेन वेदान्तसारे यत्-अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिल-कल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।

ब्रह्मज्ञानं वेदान्त स्य प्रधानविषयः

**विषयः** - विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यात्। ब्रह्मज्ञानं वेदान्तस्य प्रधानः विषयः।

**सम्बन्धः** - वेदान्तो नामोपनिषत्प्रमाणमिति वचनात् तदैक्य प्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः।

**प्रयोजनम्** -प्रयोजनं तु तद्गताज्ञाननिवृत्तपूर्वकस्वरूपानन्दावाप्तिः ब्रह्मभाववान्, मोक्षप्राप्तिर्वा, यतो हि ब्रह्मविद् ब्रह्मैव भवतीति श्रुतिप्रमाणात्। एतदनुबन्धचतुष्टयम्।

## Summarised Overview

अस्मिन् एकके वेदान्तसारानुसारम् अनुबन्धचतुष्टयं प्रतिपादितमस्ति। अनुबन्धः अधिकारी, विषयः, संबन्धः, प्रयोजनं च भवन्ति। अधिकारी-वेदान्तशास्त्राध्ययनात् यत् ज्ञानं फलं वा लभ्यते तस्योपभोक्ता एव अधिकारी इत्युच्यते । एतादृशस्य ज्ञानस्योपलब्ध्यर्थम् अधिकारिसमीपे केचिद्गुणा अपेक्षिता। अतः तस्य लक्षणं तदनुरूपमेव लक्षितम् । यथा- विधिवदधीतवेदवेदाङ्गत्वेनेत्यादिना विवेकादिसाधनचतुष्टयसम्पन्नः प्रमातैव अधिकारी। विषयः जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यात्। ब्रह्मज्ञानं वेदान्तस्य प्रधानविषयः। सम्बन्धः वेदान्तो नाम उपनिषद्प्रमाणमिति वचनात् तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः। प्रयोजनं तु तद्गताज्ञाननिवृत्तिपूर्वकस्वरूपानन्दावाप्तिः ब्रह्मभाववान्, मोक्षप्राप्तिर्वा, यतो हि ब्रह्मवित् ब्रह्मैव भवति इति श्रुतिप्रमाणात् । एतत् अनुबन्धचतुष्टयं भवति।

## Assignments

1. अनुबन्धचतुष्टयं विस्तरेण प्रतिपादयत।
2. साधनचतुष्टयं विशदयत।
3. अधिकारी कः इति वेदान्तसारदिशा विशदयत।
4. शमादिषड्कसमत्तिं निरूपयत।
5. अनुबन्धचतुष्टये विषयसंबन्धप्रयोजनानि प्रतिपादयत।

## Suggested Readings


1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

## References

1. *Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 3

# अज्ञानसृष्टिक्रमः

## Learning Outcomes

- वेदान्ततत्त्वानां अवगमनम्।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण अज्ञानसृष्टिक्रमं जानाति।

## Background

अविद्यावादः अद्वैतवेदान्तस्य प्रमुखः सिद्धान्तः। इयम् अविद्या अज्ञानम्, माया, अव्यक्तः, प्रकृतिः, मिथ्याज्ञानं, इत्यादिनामभिः अपि अभिहिताऽस्ति। इदम् अज्ञानं प्रतीयमानत्वात् ज्ञानान्तरेण निवर्तनत्वाच्च सत्त्वेन बाध्येत असत्त्वेन प्रतीयेदिति न्यायात् सदसद्भ्यां अनिर्वचनीया, त्रिगुणात्मिका, आत्मसाक्षात्कारं यावदधिष्ठानात् भावरूपा, इदमित्थं कृत्वा तत्प्रदर्शनसम्भवाभावाच्च यत्किञ्चिदिति प्रतिपाद्यते। अस्य अज्ञानस्वरूपं विशदरूपेण अस्मिन् एकके पठामः।

## Keywords

अज्ञानं,सत्,असत्, अनिर्वचनीयं, त्रिगुणात्मकं, भावरूपं, यत्किञ्चिदिति, आवरणशक्तिः, विक्षेपशक्तिः, आत्मा, प्रपञ्चस्य, अभिन्ननिमित्तोपादानकारणं, सप्तदशावयवात्मकं लिङ्गशरीरम्।

## Discussion

### 1.3.अज्ञानसृष्टिक्रमः

अज्ञानलक्षणम् -अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुमवात् "देवात्मशक्ति स्वगुणैनिगूढाम्" इत्यादि श्रुतेश्च ॥ १० ॥

#### 1.3.1.अज्ञानस्य आवरण-विक्षेपशक्तिद्वयी

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्। आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यम-ण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्न-मसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम् ।

अज्ञानस्य शक्तिद्वयम् - आवरणशक्तिः विक्षेपशक्तिः च।

तदुक्तम्

"घनच्छन्नदृष्टिर्धनच्छन्नमर्कं

यथा मन्यते निष्प्रभं चातिमूढः ।

तथा बद्धवद्भाति यो मूढदृष्टेः

स नित्योपलब्धिस्वरूपोऽहमात्मा"।॥ इति ॥

अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्व-सुखदुःखमोहात्मकतुच्छसंसारभावनापि सम्भाव्यते यथा स्वाज्ञानेनावृतायां रज्वां सर्पत्वसम्भावना। विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भाव-यत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादि प्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम् -

"विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेदि" ति ॥ वाक्यसुधा।।13 ॥

अथ इदानीमात्मनः स्वप्रकाशचैतन्यस्वरूपत्वे कथं तत्र स्वविषयकाज्ञानम् ? कथं वा असंगस्य संसारासक्तेरुदासीनस्य आत्मनः आकाशादिप्रपञ्चजनकत्वमित्येतन्महाविरोधपरिहाराय अज्ञानस्य शक्तिद्वयं निरूप्यते - अस्याज्ञानस्येति । तच्छक्तिद्वयं नामतो निर्दिशति आवरणेति । सच्चिदानन्दस्वरूपमावृणोतीत्यावरणशक्तिः । ब्रह्मादिस्थावरान्तं जगत् जलबुद्बुदवत् नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः । अज्ञानस्येयमावरणशक्तिः प्रमातुः बुद्धिमवष्टभ्य सच्चिदानन्दस्वरूपपिधायिकेत्युच्यते । वस्तुतः अज्ञानस्य आत्माच्छादकत्वाभावेऽपि प्रमातृबुद्धिमात्राच्छादकत्वेन तस्य (अज्ञानस्य) आत्माच्छादकत्वमौपचारिकम् । तेन अपरिच्छिन्नस्य स्वप्रकाशचिद्रूपाखण्डपरिपूर्णस्वरूपस्य आत्मनः, परिच्छिन्नेन अनित्येन जडतमोरूपेण अव्यापकेन अज्ञानशक्तिविशेषेण कथमावरणमिति परास्तम् । यथा स्वल्पोऽपि मेघः नेत्रसमक्षमागत्य अनेकयोजनाविस्तीर्णमपि सूर्यमण्डलं दर्शकपुरुषदृष्टिमात्राच्छादकत्वेन आच्छादयतीत्युपचर्यते तथा अज्ञानमिति तुच्छ परिच्छिन्नमपि स्वावरणशक्त्या प्रमातृबुद्धिमात्रावरकत्वेन (आच्छादकत्वेन ) आत्मानमाच्छादयतीत्युपचारादुच्यते । वस्तुतः अयमात्मा नित्योपलब्धिस्वरूपः इति कदापि केनापि कथमपि पिधातुं न शक्यः नापि च सांसारिकबन्धनैर्बद्धुं शक्यः । केवलं सुकुमारबुद्धिमद्भिरेव स (आत्मा) बद्ध इव प्रतीयते । तदुक्तम्-

सच्चिदानन्दस्वरूप मावृणोति इति आवरणशक्तिः

**"घनच्छन्न दृष्टिर्घनच्छन्नमर्कं**

**यथा मन्यते निष्प्रभं चातिमूढः**

**तथा बद्धवद्भाति यो मूढदृष्टेः**

**स नित्योपलब्धिस्वरूपोऽहमात्मा'** ।॥ इति ॥(हस्तामलक १०]

यथा, अतिमूढः, धनच्छन्नदृष्टिः (सन्) अर्कम्, घनच्छन्नम्, अतः निष्प्रभन्, च, मन्यत, तथा, मूढदृष्टेः, यः, (आत्मा), बद्धवत्,

भाति. सः, नित्योपलब्धिस्वरूपः, आत्मा ( एव) अहम् ॥ इत्यन्वयः।

आत्मनो भेदबुद्धिसमुत्पादकत्वेनेयमावरणशक्तिरेव संसारहेतुः। यदा आत्मा अनया अज्ञानावरणशक्त्या युक्तो भवति तदैव सांसारिकविषयेषु सुखित्वदुःखित्वकर्तृत्वभोक्तृत्वञ्च मन्यते । किन्तु सर्वमिदं रज्जुसर्पभावनेव मिथ्या वर्तते । वस्तुतः नामरूपात्मकं समस्तं जगत् ब्रह्मैव, संसारभावना च अज्ञानमूलैवेति विभावनीयम्। यदुक्तमसङ्गोदासीनस्य आत्मनः जगत्कारणत्वं कथमिति तन्निरासार्थ विक्षेपशक्तेः स्वरूपमाह - विक्षेपशक्तिस्त्विति। आब्रह्मस्थावरान्तं नामरूपात्मकस्य जगतः समुत्पादिका शक्तिः विक्षेपशक्तिः। यथा रज्जुविषयकमज्ञानं पूर्वं स्वशक्त्या रज्जुमावृणोति पश्चात् तदेवाज्ञानं निजविक्षेपशक्त्या तत्रावृते रज्जौ सर्पमुत्पादयति तथा आत्मविषयकमज्ञानपि पूर्वं निजावरणशक्त्या आत्मानमावृणोति पश्चात् तदेव अज्ञानं निजविक्षेपशक्त्या तत्रात्मनि सूक्ष्मशरीरादारभ्य ब्रह्माण्डपर्यन्तमाकाशादिप्रपञ्चमुत्पादयति । एतादृशमज्ञानस्य सामर्थ्यम्।

आत्मनः भेदबुद्धिसमुत्पादकत्वेनेयमावरणशक्तिरेव संसारहेतुः।

### 1.3.2.प्रपञ्चस्य निमित्तकारणमुपादानकारणञ्चात्मैव

**शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ॥ १५ ॥**

आवरण-विक्षेपशक्तिमदज्ञानोपाधिना युक्त आत्मा (ईश्वरः) प्रपञ्चस्य कारणमित्युक्तम् एक एव चेतनात्मा प्रपञ्चस्य निमित्तमुपादानञ्चोभयं कारणं भवति । तत्रोर्णनाभिदृष्टान्तम्प्रदर्शयति - यथा लूतेति ।' यथा लूता (ऊर्णनाभिः) स्वस्मादुत्पाद्यमानं तन्तुरूपकार्यम्प्रति स्वचैतन्यप्रधानतया निमित्तकारणं, चैतन्यं विना जडस्य देहस्य मृतशरीरवत् तन्तूत्पादकत्वासंभवात् स्वशरीरप्राधान्येन चोपादानकारणं भवति, तथा अज्ञानोपाधियुक्तः आत्मा चैतन्यप्रधानतया प्रपञ्चस्य निमित्तकारणम्, अज्ञानप्रधानतया

चोपादानकारणं भवति । चैतन्यरहितं लूताशरीरं तन्तुजालं वोत्पादयितुं न शक्नोति । तच्छरीराभावे च केवलेन चैतन्यांशेनापि तन्तुजालयोरेकतरदपि निष्पादयितुं न शक्यते । अतस्तन्तुजाललक्षणकार्यम्प्रति लूतायाः (ऊर्णनाभेः) शरीरचैतन्ययोरुभयो कारणत्वेऽपि चैतन्यप्राधान्येन लूताशरीरस्य निमित्तत्वम्, यतश्चैतन्यशून्येन शरीरमात्रेण तन्तुजालनिष्पादनाऽसम्भवात् । शरीरप्राधान्ये च लूतायाः

मायया सूक्ष्मशरीरादारभ्य ब्रह्माण्डान्तं स्थूलं जगदुत्पादयति।

(ऊर्णनाभेः) साक्षात् सम्बन्धितया तन्तूत्पादानत्वम् । तदवच्छिन्नस्य चैतन्यस्यापि (शरीरनिष्ठस्यात्मनोऽपि ) परम्परया तन्तूपादानकारणत्वमौपरचारिकम् । अनेनैव प्रकारेण आत्माऽपि (ईश्वरोऽपि) स्वचैतन्यप्राधान्येन चराचरप्रपञ्चस्य निमित्तकारणं, स्वोपाधिभूताऽज्ञानप्राधान्येन च चराचरप्रपञ्चस्योपादानकारणम् । इदमत्र बोध्यं, समस्तमिदं जगत् अज्ञानजन्यम् । अज्ञानञ्च जगतः उपादानकारणम् । अज्ञानञ्चाऽऽत्मनिष्ठमिति आत्मनोऽपि (ईश्वरस्यापि) पारम्परिकं जगदुपादानत्वं न विरुद्धम् । यथोर्णनाभिः तुरीयेमादिबाह्यसाधनानि निरपेक्ष्यैव तन्तुं जालं वा निष्पादयितुं शक्नोति, तथैवात्मा ऽपि(ईश्वरः) सृष्ट्यादौ एकाकी एव स्वोपाधिभूतया मायया (अज्ञानेन) सूक्ष्मशरीरादारभ्य ब्रह्माण्डान्तं स्थूलं जगदुत्पादयति । मुण्डकोपनिषदि (१।१।६) 'यथोर्णनाभि'रित्यादिना एतदेव प्रपञ्चितम् ।

### 1.3.3.सृष्टिक्रमः

**तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इत्यादिश्रुतेः ।**

**तेषु जाड्याधिक्यदर्शनात्तमः प्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥ १६ ॥**

अधुना अज्ञानस्य विक्षेपाभिधायाः शक्तेः कार्यं (कार्य- भूतस्य जगतः उत्पत्तिम्) निरूपयति - तमः प्रधानेति । विक्षेपशक्तिः

यद्यपि तमोगुणप्रधानास्ति तथापि तस्यां रजस्सत्त्वयोरपि किंचित् सत्ता भवति। अतः 'कारणगुणाः कार्यगुणानारभन्ते' इति नियममनुसृत्य यत्किञ्चिद्रजस्सत्त्वसत्तासम्पन्नया तमोगुण-प्रधानया विक्षेपशक्त्या सहितः यः अज्ञानोपाधिः तेन विशिष्टस्यैव चैतन्यस्य (आत्मन एव) आकाशादिप्रपञ्चोत्पादकत्वम् । अर्थात् एतादृशाऽज्ञानो-पहितचैतन्यात् (आत्मनः सकाशात्) आकाशः, आकाशाद् वायुः, वायोः सकाशाद् अग्निः, अग्नेः सकाशात् जलम्, जलात् पृथिवी चोत्पद्यते । एवञ्च आकाशादिप्रपञ्चस्य जडत्वात् तमोगुणप्रधानविक्षेपशक्तिविशिष्टाज्ञानावच्छिन्नचैतन्यस्यैवाका शादिप्रपञ्चजनकत्वं सिद्धयति।

आकाशात् वायुः वायोः अग्निः,अग्नेः जलम्, जलात् पृथिवी च उत्पद्यते।

ननु अज्ञानस्य त्रिगुणात्मकत्वात् कथं तमोगुणमात्रप्राधान्येन आकाशादि- प्रपंचोत्पादकत्वमित्याशंक्याह- "तदानीमिति" । तदानीमुत्पत्तिवेलायां सत्त्वादयः त्रयोऽपि गुणाः तारतम्येन कारणगुणप्रक्रमन्यायेन तेषु आकाशादिषु पंचभूतेषु उत्तरोत्तराधिक्येन जायन्ते । इमानि एवं सूक्ष्मशरी-रादिकारणभूतानि अपञ्चीकृतानि सूक्ष्मरूपपञ्च-भूततन्मात्राणीत्युच्यन्ते इत्याह- "एतान्येवेति" । अव्याकृतात् पञ्चतन्मात्राणि क्रमेण जायन्ते इति स्मृतीतिहासपुराणेषु प्रसिद्धिः, तत्कथमाकाशादेरिहोत्पत्तिर्वर्णितेति शङ्का निरस्ता भवति, यतः एतान्येव आकाशादीनि सूक्ष्मभूतानि व्यवहारसूक्ष्माणि तन्मात्राणि शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि परस्परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिः ।

### 1.3.4.सप्तदशावयवात्मकं लिङ्गशरीरम्

**सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसो कर्मेन्द्रियपञ्चकं वायुपंचकं चेति । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुजिह्वा घ्राणाख्यानि । एता-न्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः । मनो नाम संकल्पविकल्पात्मिकान्तःकरणवृत्तिः । अनयोरेव**

चित्ताहंकारयोरन्तर्भावः । एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वा-त्सात्विकांश कार्यत्वम् । इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोक-परलोकगामी व्यावहारिको जीव इत्युच्यते । मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति । कर्मेन्द्रियाणि वाक्पाणिपाद-पायूपस्थाख्यानि । एतानि पुनराकाशादीनां रजोऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासा-ग्रस्थानवर्ती । अपानो नामावाग्गमनवान्पाय्वादिस्थानवर्ती । व्यानो नाम विष्वगमनवानखिलशरीरवर्ती। उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः। समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । केचित्तु नागकूर्म-कृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति । तत्र नाग उद्गिरणकरः। कूर्म उन्मीलनकरः । कृकलः क्षुत्करः । देवदत्तो जृम्भणकरः। धनञ्जयः पोषणकरः । एतेषां प्राणादिष्व-न्तर्भावात्प्राणादयः पञ्चैवेति केचित् । एतत्प्राणादिपञ्चक-माकाशादिगत रजोऽशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति । एतत्कोशत्रयं मिलितं सूक्ष्मशरीरमित्युच्यते ॥१७॥

वायवः प्राणापानव्यानोदान समानाः

लिङ्गशरीरं निरूपयति - सूक्ष्मशरीराणीति । सूक्ष्म शरीराणां सप्तदश अवयवाः सन्ति । सूक्ष्मशरीराण्येव लिङ्गशरीराणीत्युच्यन्ते । लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भावः एभिरिति लिङ्गानि, तानि च तानि शरीराणि च शरीरप्रतिष्ठ-त्वाच्छरीरसाधनत्वाद्वा धर्मादिद्वारेण लिङ्गशरीराणि । सूक्ष्मशरीरस्वरूपभूतान् अवयवानाह-अवयवास्त्विति । पञ्चज्ञानेन्द्रियाणि, बुद्धिमनसी, पश्वकर्मेन्द्रियाणि पञ्चवायवश्चेति मिलित्वा सप्तदश अवयवा भवन्ति । तत्र श्रोत्रत्वक्चक्षुजिह्वा घ्राणाख्यानि ज्ञानेन्द्रियाणि सन्ति । ज्ञान-

सूक्ष्मशरीरम्-
पञ्चज्ञानेन्द्रियाणि
बुद्धिमनसी
पञ्चकर्मेन्द्रियाणि
पञ्चवायव च

साधनानि इन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि । तेषां शब्दस्पर्शरूपरसगन्धग्राहकेन्द्रियत्वेन प्रत्येकं यथाक्रमं लक्षणानि। इन्द्रियाणि आहङ्कारिकाणीति सांख्याः तान् निराकुर्वन् तेषां भौतिकत्वं साधयति - एतेनेति। कारण गुणेन उत्पन्नत्रिगुणानां भूतानां सत्त्वगुणावच्छिन्नेभ्यः अंशेभ्यः गुणोद्रेककृतभागेभ्यः श्रोत्रादीनि जातानि । अर्थात् सात्त्विकांशात् आकाशात् श्रोत्रमुत्पद्यते, सात्त्विकांशाद्वायोः त्वगिन्द्रियं, सात्त्विकांशात् तेजसः चक्षुः, सात्त्विकांशात् जलात् जिह्वा, सात्त्विकांशायाः पृथिव्याः सकाशात् घ्राणेन्द्रियं चेति क्रमेणोत्पद्यन्ते । बुद्धेर्लक्षणमाह- बुद्धिर्नामेति । ब्रह्मैवाहमिति निश्चयात्मिका अन्तःकरणवृत्तिरेव बुद्धिः । मनसो लक्षणमाह - मनोनामेति । संकल्पः इदं नीलं, इदं पीतमिति विषयविवेचनम् । विकल्पस्तद्विपर्यय इति भेदः । अहं चिद्रूपः देहो वेति संशयात्मिका अन्तःकरणवृत्तिरेव मन इत्यर्थः । ननु अन्तःकरणस्य चतुष्टयत्वप्रसिद्धेः कथमिह द्वयमेव गृहीतमित्याह- अनयोरेवेति । अनुसन्धानात्मिका अन्तःकरणवृत्तिः चित्तम् । अभिमानात्मिका अन्तःकरणवृत्तिः अहङ्कारः । चित्तस्य बुद्धौ अन्तर्मावः विषयपरिच्छित्तिरूपत्वाविशेषात्, इदमित्ययमेवेति विषयपरिच्छेदः । अहङ्कारस्य मनसि अन्तर्भावः तस्यापि सङ्कल्पात्मकत्वाविशेषात् । एवञ्च स्मरणात्मकस्य चित्तस्य गर्वात्मकाहङ्कारस्य च बुद्धिमनसोरन्तर्भाव इत्यर्थः । यद्यपि अन्तःकरणत्वेन चतुर्णामेकत्वं तथापि एकस्यैव पुरुषस्य पाचकः, पाठकः इत्यादिवृत्तिभेदात् भेदवत् एकस्यापि अन्तःकरणस्य निश्चयसंशयस्मरणाहङ्कारविषयभेदैर्बुद्ध्यादिभेदः । बुद्धेहि अपूर्वो विषयः, चित्तस्य पूर्वानुभूतः । तथा मनसो बाह्यः आभ्यन्तरश्च सर्वो विषयो यथायोगम् । अहङ्कारस्य तु अनात्मोपरक्त आत्मैव । अतो विषयभेदेऽपि स्वरूणाऽभेदात् युक्तोऽन्तर्भावः । एवं स्वरूपाभेदेऽपि विषयभेदात् क्वचित् क्वचित् चित्ताहङ्कारयोर्बुद्धिमनोभ्यां पृथङ्निर्देशः क्रियते । चतुर्णामपि अन्तःकरणभेदानां भौतिकत्वमाह - एते पुनरिति । पूर्ववत् एतानि चत्वारि आकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यः उत्पद्यन्ते । तत्र मनोबुद्धिचित्ताहङ्काराः प्रकाशात्मकाः, एतदेव

**ज्ञानेन्द्रियसहितबुद्धिः विज्ञानमयकोशः**

एतेषां ज्ञानेन्द्रियाणाञ्च महाभूतसात्त्विकांशकार्यत्वे प्रमाणम् । सर्वकार्यभूतः प्रकाशः इन्द्रियान्तःकरणेषु उपलभ्यमानः तेषां सत्त्वकार्यतां गमयतीत्यर्थः। निरूप्यमाणे लिङ्गशरीरे उक्तैरन्यथा सिद्धमवान्तरभेदं बुद्धेविज्ञानमयकोशत्वं दर्शयति- इयं बुद्धिरिति । बुद्धिग्रहणेन अर्थात् मनोवृत्तिरभिप्रेता । बुद्धेः सत्त्वकार्यत्वात् ज्ञानेन्द्रियसहितेन प्रकाशाधिक्याद् विज्ञानमयत्वम्, आत्माच्छादकत्वाच्च कोशत्वमित्यर्थः। एवञ्च ज्ञानेन्द्रियसहितबुद्धिर्विज्ञानमयकोश इत्युच्यते। विज्ञानमय-कोशयुक्तं चैतन्यं कर्तृत्व- भोक्तृत्व-सुखित्व-दुःखित्वा-द्यभिमानित्वेन स्वर्गादिलोकान्तरगामि भवति। व्यावहारिकदशायां च एतदेव विज्ञानमयकोशयुक्तं चैतन्यं जीवसंज्ञा प्राप्नोति। अर्थात् विज्ञानमयकोशावच्छिन्नः चिदात्मा व्यावहारिको जीव इत्युच्यते। विशुद्ध-बुद्धि-प्रतिबिम्बितः विदात्मा जीव इत्यर्थः । व्यवहारमेव विशेषणान्तरेण व्यनक्ति इहलोकेति । तत्र हेतुमाह- कर्तृत्वेति । तप्तायःपिण्डवत् बुद्ध्यारोपितं चैतन्यं वस्तुतः अकर्तृभोक्तृनित्यान-न्दापरिच्छिन्नमक्रियमपि भोक्तृत्वकर्तृ त्वदुःखित्वपरिच्छिन्नत्व क्रियावत्वाद्यभिमानेन स्वर्गादिलोकान्तरगामित्वं व्यावहारिकजीवत्वं लभते इत्यर्थः।

सत्त्वगुणांशोत्पन्नत्वेन सत्त्वगुण-प्रधानं, चक्षुः श्रोत्रादि-ज्ञानेन्द्रियसहितञ्च मनो मनोमयकोश इत्युच्यते । मनसः सत्वगुणांशकार्यत्वेऽपि रजोविकारेच्छारूपित्वेन संकल्पविकल्पात्मकत्वात् बुद्ध्यपेक्षया अधिकजडत्वाच्च मनोमयत्वम्, चैतन्याच्छादकत्वाच्च कोशत्वम् । कर्मसाधनानि इन्द्रियाणि कर्मेन्द्रियाणि, तानि वाक्पाणिपादपायूपस्थाख्यानि। वचनादानगमनविसर्गानन्दसाधनेन्द्रियत्वं यथाक्रमं वागादीनां प्रत्येकलक्षणम् ।वागादिपञ्चकर्मेन्द्रियाणि आकाशादि-रजोगुणांशेभ्यः क्रमशः पृथक् पृथक् उत्पद्यन्ते। आकाशादिभूतेषु सत्त्वरजस्तमसां त्रयाणामपि गुणानां विद्यमानत्वेऽपि तेषु रजोगुणबाहुल्यात् तत्कार्यभूतेषु वागादिषु रजोगुणांशस्याधिक्यम् । तथा च - रजोगुणप्रधानात् आकाशाद् वाक् उत्पद्यते, रजोगुणप्रधानाद्वायोः पाणीन्द्रियम्,

प्राणापानव्यानोदान
समानाख्याः
पञ्चवायवः।

रजोगुणप्रधानात् अग्नेः पादेन्द्रियम्, रजोगुणप्रधानाद् जलात् पाय्विन्द्रियं, रजोगुणप्रधानायाः पृथिव्याः गुह्येन्द्रियमुत्पद्यते । एवञ्चेन्द्रियाणां भौतिकत्वं स्थितं भवति । अधुना वायुपञ्चकं विभजते-वायव इति । प्राणाख्यः, अपानाख्यः, व्यानाख्यः, उदानाख्यः, समानाख्यः इति पञ्च वायवः सन्ति । प्राणस्य लक्षणमाह- प्राणो नामेति । प्राग्गमनमग्रतो निःसरणं यद्यपि "प्राणो हृदये" (तै० ब्रा० ३।१०।८।५) इति श्रुतेः हृदयस्थानः प्राणः, तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वात् नासाग्रस्थामवर्तीत्युक्तम् । अपानस्य लक्षणमाह- अपानो नामेति। अधो नाभेः अधस्ताद्गमनवान् मलापनयव्यापारेण । पायुर्गुदं तत्थानवर्तीत्यर्थः । आदि शब्दादुपस्थग्रहः । तत्रापि मूत्ररेतोविसर्गस्य अपानकर्मत्वात् । एवश्च अधोगमनशीलः पाय्वादिस्थानी वायुः अपानः । व्यानस्य लक्षणमाह-व्यानो नामेति । विष्वक् परितः सर्वतो गमनं विद्यते यस्य सः तथा । प्राणापाननियमनकर्मारण्यामग्न्युत्पादनादिवीर्यवत्कर्म हेतुत्वात् अखिलशरीरवर्ती व्यानाख्यो वायुः । उदानस्य लक्षणमाह - उदानो नामेति । ऊर्ध्वमुत्क्रमणशीलः कण्ठ- स्थानी वायुः उदानः। समानस्य लक्षणमाह- समानो नामेति । अशितादेः सम नयनात् समानः । शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः । प्राणादिवायूनां वायुत्वेन रूपेण एकत्वेऽपि क्रियाभेदेन भेदः । स्वमतपरिशुद्धये मतान्तरमुत्थापयति - केचित्त्विति । कापिलमतानुसारिणः क्रियाभेदेन अन्ये- ऽपि पञ्चवायवः सन्तीति वदन्ति । तान्येव नामतो निर्दिशति - नाग इत्यादि । तथाचोक्तम्- "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः । कृकलस्तु क्षुति ज्ञेयो देवदत्तो विजृम्भणे । न जहाति मृतं चापि सर्वव्यापी धनञ्जयः ।।" इति । (गोरक्षाष्टक ३५, ३६) । उद्गिरणं छर्दिः । उन्मीलनशब्दः निमीलनस्यापि उपलक्षणपरः । उत्थापितं मतं प्रत्याचष्टे - एतेषामिति । केचित् शब्दः औपनिषदविषयः । वेदान्तिनः नागादीनां वायूनां प्राणादिपञ्चकेष्वेव अन्तर्भावं कथयन्ति । उद्गिरणं हि ऊर्ध्वमुखस्य वायोः क्रिया, ऊर्ध्वमुखो वायुः उदान इत्युक्तम् । तथा च उदानेनैव उद्गिरणस्यापि 'सिद्धो नागस्य तत्कर्तुं रुदाने अन्तर्भावात् न ततः पृथक्त्वम् ।

उन्मीलनशब्द अङ्गचेष्टान्तर्गतत्वात् तस्याश्च व्याननिमित्तकत्वात् उन्मीलनकर्तुः कूर्मस्थ व्याने अन्तर्भावः । समानेन अशितपीतादीनां पाकेन रसादिभावमापाद्य सकलशरीरदेशेषु तत्प्रवेशने कृते सत्येव क्षुधोत्पत्तेः तत्कर्तुः कृकलस्य समाने अन्तर्भावः । जृम्भणस्य निद्रालस्यादिहेतुकत्वात् निद्रालस्यादेश्च धातुमलाद्यन्नोपजीवननिमित्तकत्वात् अन्नस्वीकरणस्य च अपानकर्मत्वात् अपाने एव परम्परया जृम्भणहेतोः देवदत्तस्य अन्तर्भावः। अपानाख्यस्य अन्तर्मुखतया शरीरान्तः प्रविशतः वायोः अन्नस्वीकरणहेतुत्वमैतरेयके समाम्नायते- “तदपानेनाजिघृक्षत्तदावयत्"- (ऐत० ३।१०) रसलोहितमांसादिक्रमेण शरीरे अन्नपरिणामे सत्येव पोषणापरपर्यायाः पुष्टेः सम्भवात् रसादिनयनकर्तरि समाने धनञ्जयस्य अन्तर्भावः । तथा च प्राणादीनामेव यथायथं उद्गारादिक्रियानिमित्ततया अवस्थान्तरमापद्यमानानां नागादिसंज्ञाया अपि उपपत्तिस्तत्त्वान्तरकल्पनं तेषां गौरवमप्रामाणिकम् । प्राणादिवायूनामुत्पत्तिकारणापेक्षायामाह - एतत्प्राणादीति । अपञ्चीकृत पञ्चमहाभूतेभ्यः रजःप्रधानेभ्यः प्राणादयः उत्पद्यन्ते । एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वम् आत्माच्छादकत्वात् कोशत्वं च भवति । कर्मेन्द्रियसहिताः पञ्चप्राणाः प्राणमय कोश इत्युच्यते । प्राणादीनां क्रियात्मकत्वात् रज्जु कार्यत्वम् । तत्र एतेषु त्रिषु अन्नमय-मनोमय प्राणमयकोशेषु विज्ञानमयकोशः ज्ञानशक्तिसम्पन्नः, अतः स कर्तेति निगद्यते । मनोमयकोशः इच्छाशक्तिसम्पन्नः, अतः विवेकसाधकत्वेन स करणमित्युच्यते । प्राणमयकोशश्च गमनादिक्रियासम्पन्नः, अतः स कार्यमित्युच्यते ।

विज्ञानमयः ज्ञानशक्तिसम्पन्नः

मनोमयः इच्छाशक्तिसम्पन्नः

ज्ञानेन्द्रियसहितः बुद्धिरूपः कर्ता मनोज्ञानेन्द्रियरूपकरणसाहाय्येन प्राणादिपञ्चकद्वारा कर्मेन्द्रियपञ्चकद्वारा च गमनादिकार्यं कारयति । तत्तत्कार्यसम्पादनक्षमतानुसारमेव एते कर्तृकरणकार्येति संज्ञां लभन्ते । एतत् त्रयं मिलित्वा सूक्ष्मशरीरमिति व्यवह्रियते ।। १७ ।।

### 1.3.5.सूक्ष्मप्रपञ्चनिरूपणम्

सूक्ष्मप्रपञ्चनि-रूपणम्

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च । अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते। एतद्व्यष्ट्युपहितचैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् । अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते । एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः 'प्रविविक्तभुक्तैजस' इत्यादिश्रुतेः(माण्डूक्यम्-3)। अत्रापि समष्टिव्यष्टयोस्तदु-पहितसूत्रात्म तैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशय-जलवत्तद् गतप्रतिबिम्बाकाशवच्चाभेदः । एवं सूक्ष्मशरीरोत्पत्तिः ।१८।

व्याख्या - श्रुतिषु अज्ञानवदेव लिङ्गशरीरस्यापि एकत्व-बहुत्वश्रवणात् तदेकत्वाऽनेकत्वयोर्व्यवस्थां अत्र दर्शयति। यथा अज्ञानस्य समष्टित्वेन व्यष्टित्वेन च व्यवहारस्तथैव चराचरप्राणिमात्रस्य यावन्ति अनन्तानि सूक्ष्मशरीराणि (लिंगशरीराणि) सन्ति, तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन प्राणेन स्वीयैकबुद्ध्या विषयीकृतत्वात् वनवज्जलाशयवद्वा समष्टित्वम् । तत्र दृष्टान्तमाह-वनवदित्यादि । अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं प्रदर्शयति- अनेकेति । अनेकेषां जीवानां प्रत्येकं स्वस्वसूक्ष्मशरीरस्य स्वस्वबुद्धिविषयतया वृक्षवत् नद्यादिवद्वा व्यष्टित्वम् । एतत्सूक्ष्मशरीरसमष्टिरूपेण उपाधिना उपहितं चैतन्यं मालायां सूत्रमिव सर्वत्र अनुस्यूतत्वात् पूर्वोक्तज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाधिना उपहितत्वाच्च सूत्रात्मा, हिरण्यगर्भः, प्राणश्चोच्यते । अर्थात् निमित्तत्रयेणायं त्रिविधो व्यादेशः, सर्वत्र अनस्यूतत्वात् सूत्रात्मा। ज्ञानशक्तिमदन्तःकरणोपहितत्वात् हिरण्यगर्भः। क्रियाश-

क्तिमदधिदैवतप्राणरूपत्वात् प्राणः । सूत्रात्मकस्य हिरण्यगर्भस्यास्य एषा ( सूक्ष्मशरीर ) समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरम्, विज्ञानमयादिकोशत्रयम् एवं विराड्रूपेण अनुभूतस्थूलप्रपञ्चविषयकवासनामयत्वात् स्वप्नः । यतः सूक्ष्मत्वं स्वप्नत्वं च, अतएव स्थूलप्रपञ्चस्य लयस्थानमप्युच्यते। विज्ञानमयादि समष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्त्रगर्भत्वम् प्रतिपाद्य, इदानीं विज्ञानमयादिव्यष्ट्युपाध्यवच्छिन्न चैतन्यस्य तैजसत्वं निरूपयति- एतद्व्यष्टीति । एतत्सूक्ष्मशरीरव्यष्टयुपहितं चैतन्यं, तेजोमयान्तःकरणोपाविना उपहितत्वात् तैजस इत्युच्यते । अस्य तैजसस्यापि इयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरम्, विज्ञानमयादिकोशत्रयम्, एवं विश्वाख्येन चैतन्येत अनुभूतस्थूलशरीरविषयकवासनामयत्वात् स्वप्नः । यतः सूक्ष्मत्वं स्वप्नत्वं च अत एव स्थूलप्रपञ्चस्य लयस्थानमप्युच्यते । एवञ्च-विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मशरीरमिति वेदितव्यम्। यथापूर्वं प्राज्ञेश्वरी अज्ञानवृत्तिभिः सुषुत्यवस्थायाम् आनन्दमनुभवतः, तथा हिरण्यगर्भतैजसो अपि स्वप्नावस्थायां सूक्ष्माभिः मनोवृत्तिभिः वासनामयान् सूक्ष्मशब्दादिविषयान् अनुभवतः। अर्थात् स्वप्नावस्थायां निद्रादिदोषदूषितस्य अदृष्टा-दिसमुद्बोधितसंस्कारविशेषसचिवस्य अन्तःकरणस्य याः संस्कारानुरूपाः वृत्तयः तादृगन्तःकरणसंसृष्ट-चैतन्यस्थाऽविद्याशक्तिविजृम्भितविषयाकाराः ताभिः सूक्ष्मवियान् जाग्रद्वासनामयान् ईषत् अस्फुटान् अनुभवतः । अयं स्वप्नः न स्मृतिः अपरोक्षावभासितत्वात् । अत्रापि विज्ञानमयादिकोष त्रयसमष्टिव्यष्ट्योः तदुपहितसूत्रात्म-तैजसाख्यचैतन्ययोश्च वन-वृक्षवत्तदवच्छिन्नकाशवच्च, एवं जल-जलाशय-पतित-प्रतिबिम्बवच्च अभेदः । अनेन प्रकारेण अपञ्चीकृतमहाभूतेभ्यः सकाशात् सूक्ष्मशरीरोत्पत्तिः संजायते ।

विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरम्

## Summarised Overview

अविद्यावादः अद्वैतवेदान्तस्य प्रमुखः सिद्धान्तः । अविद्या माया, अज्ञानं, अव्यक्तः, प्रकृतिः इत्यादि नामभिः अपि अभिहिताऽस्ति। वेदान्तसारे अविद्या अज्ञानं इति रूपेण अवतरति। अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढां" इति अज्ञानस्य निर्वचनम्।अस्य अज्ञानस्य आवरणशक्तिःविक्षेपशक्तिः इति शक्तिद्वयं वर्तते। अज्ञानस्य आवरणशक्त्या ब्रह्मणः यथार्थस्वरूपम् आवृणोति। विक्षेपशक्त्या प्रपञ्चावबोधं जनयति।

## Assignments

1.अज्ञानं तस्य शक्तिद्वयं च वर्ण्यताम्।
2.सृष्टिक्रमं विशदयत।
3.सूक्ष्मशरीरस्य स्वरूपं निरूपयत।
4.पञ्चप्राणानां निरूपणं कुरुत।
5. सूक्ष्मप्रपञ्चं विशदयत।

## Suggested Readings

1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

# References

*1.Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011**1.**

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# पञ्चीकरणम्

## Learning Outcomes

- वेदान्ततत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण पञ्चीकरणप्रकारं जानाति।

## Background

अद्वैतवेदान्तस्य प्रसिद्धः प्रकरणग्रन्थः भवति वेदान्तसारः। वेदान्तसारे प्रथमं अधिकारिविषयसंबन्धप्रयोजन-अनुबन्धचतुष्टयं विस्तरेण प्रतिपादयति। अनन्तरं अध्यारोपः, अज्ञानस्य लक्षणं, तस्य आवरणविक्षेपणशक्तिद्वयं प्रतिपाद्य प्रपञ्चसृष्टिक्रमं विशदीकरोति। अपञ्चीकृतमहाभूतेभ्यः सूक्ष्मप्रपञ्चोत्पत्तिः, पञ्चीकृतमहाभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः भवति पूर्वेऽस्मिन् एकके पठितम्। इदानीं स्थूलप्रपञ्चोत्पत्तिनिरूपणं क्रियते। तदर्थं पञ्चीकरणप्रकारज्ञानम् आवश्यकम्।

## Keywords

पञ्चीकरणं, आकाशः, अग्निः, वायुः, जलं, भूमिः, द्विधा विभजनम्, स्थूलप्रपञ्चोत्पत्तिः, भूतेभ्यः चतुर्दशलोकानां उत्पत्तिः

SGOU

## Discussion

### 1.4.1.पञ्चीकरणम्

स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादि-पंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम्। तदुक्तम्-

"द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।

स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते" इति ।।

अस्याप्रामाण्यं नाशंकनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च "वैशेष्यात्तद्वादस्तद्वाद" इतिन्यायेनाकाशादिव्यपदेशः संभवति । तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ॥ १९ ॥

पञ्चीकृतमहाभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः

व्याख्या-अपञ्चीकृतमहाभूतेभ्यः सूक्ष्मप्रपञ्चोत्पत्तिः, पञ्चीकृतमहाभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिर्भवतीति पूर्वमुक्तमासीत्। तदनुसारेण सूक्ष्मप्रपञ्चोत्पत्तेनिरूपणमेतावता कृतम् । इदानीं स्थूलप्रपञ्चोत्पत्तेनिरूपणं कर्तव्यमस्ति, तदर्थं पञ्चीकरणप्रकारज्ञानस्य अपेक्षणीयत्वेन अधुना तत्प्रकारो निरूप्यते-स्थूलशरीरस्य उत्त्पत्तिं वर्णयितुमुपक्रमते-'स्थलेति।'

'तु' शब्दः पूर्वस्माद् वैषम्यं सूचयति-पञ्चीकृतानीति। अपञ्चीकृतसूक्ष्मभूतानामपेक्षया स्थूलभूतानि पञ्चीकृतानि भवन्ति । पंचीकरणं वर्णयति - पञ्चीकरणन्त्विवति । सृष्टिसमये पूर्वसृष्टिस्थितानां समस्तप्राणिनाम् अदृष्टवशात् ईश्वरप्रेरणया आकाशवायुतेजोऽबन्नानि, अविद्यासहायभूतात् परमात्मनः सकाशात् अनुक्रमजातानि अपञ्चीकृतानि सूक्ष्माणि व्यवहारसम्पादने असमर्थानि इति कृत्वा तदीयस्थौल्यापेक्षायां

व्यवहारकर्तृणाम्प्राणिनां धर्माधर्मापेक्षयैव तान्येव सूक्ष्मभूतानि पञ्चीकृतानि भवन्ति ।

पञ्चीकरणप्रकारः- आकाशादिपञ्चमहाभूतेषु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् चतुर्धा समं विभज्य प्रत्येकमहाभूतस्य पञ्च पञ्च भागाः कृताः (एकः अर्धभागः, चत्वारश्च अष्टमांशभागाः) ततः चत्वारः अष्टभांशभागाः- स्वस्वद्वितीयार्धभागपरित्यागेन अन्यमहाभूतानां चतुर्षु अर्द्धभागेषु एकैकं संयोजिताः । तथा च प्रत्येकस्य महाभूतस्य अन्येषां चतुर्णां महाभूतानामष्टमांशविशिष्टस्वकीयाधीशतया पञ्चमहाभूतशिष्टत्त्वं सञ्जायते । (अयमेव विधिः 'द्विधाविधाय चैकैकं' इति पद्येन पञ्चदश्यां तथा 'पृथिव्यादीनि भूतानि' इत्यादि च वार्तिके प्रतिपादितः ) ।

अस्मिन्नर्थे वृद्धसम्मतिमाह-तदुक्तमिति ।

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।

स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ।।'

( पं० ५० १।२७)

ननु व्योमादिपञ्चानां प्रत्येकं पञ्चात्मकत्वं स्वरूपाविनाशेऽपि कथं स्यादित्याशंक्य तत्प्रकारं प्रकटयति- द्विघेति ।

अत्रापि सूक्ष्मशरीरसामग्र्याद्युत्पत्तौ इव मायावृत्यात्मकः ईश्वरसङ्कल्प एव निमित्तमनुवर्तते । एवं च सत्यसङ्कल्पः परमेश्वरः सङ्कल्पमात्रेणैव एकैकमाकाशादिकं भूतं द्विधा द्विप्रकारकं विधाय कृत्वा पुनः प्रथमं द्विधाकृतमाद्यभागं चतुर्धा विधाय स्वस्वशब्दाभिहिततत्तद्भूतभिन्नभूतसंबन्धिद्वैधीकृतत्व-प्रयुक्तावशिष्टद्वितीयभागैः सह योजनात् सम्मेलनात् पञ्चापि ते महाभूतपदार्थाः पञ्चचाकाशाद्यर्धभागात् तदितराष्टमहा-भागेभ्यश्च हेतोः आकाशाद्यभिधाः भवन्ति ।

त्रिवृत्करणश्रुतेः पञ्चीकरणश्रुतेरपि उपलक्षणत्वात्।

ननु छान्दोग्ये तेजोबन्नानां उत्तरोत्तरक्रमेण उत्पत्तिमभिधाय तत्त्रिवृत्करणात् (प्रत्येकार्धभागविशिष्टात् इतरतुरीयांशभागात्)

सृष्टिः प्रतिपादिता, अत्र च पञ्चीकरणात् सृष्टिः प्रतिपाद्यते इति उभयोविरोध इति चेत्, न । त्रिवृत्करणश्रुतेः पञ्चीकरणश्रुतेरपि उपलक्षणत्वात् (स्वबोधकत्वे सति स्वेतरबोधकत्वात्), अर्थात् भूतत्रयसृष्टिश्रुतौ सृष्टिपरिपूर्त्यर्थं अश्रुतमपि भूतद्वयमाश्रित्य भूतपञ्चकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनात् अविरोधः । पञ्चीकृतानामाकाशादीनां पञ्चात्मकत्वाऽविशेषात् आकाशादिव्यपदेशो न स्यादित्याशङ्क्य परिहरति- 'पञ्चानामिति'। पञ्चानां महाभूतानां पञ्चात्मकत्वे समानेऽपि स्वस्वार्थभागानाम् आधिक्येन वर्तमानात् आकाशादिव्यवहारोपपत्तिः । अतएव पञ्चीकृताकाशे शब्दः, पञ्चीकृतवायौ शब्दस्पर्शौ, अग्नौ च शब्दस्पर्शरूपाणि, जले च शब्दस्पर्शरूपरसाः, पृथिव्याश्च शब्दस्पर्शरूपरसगन्धाः उत्तरोत्तरं स्वस्वकारणानुरूपं स्पष्टरूपेण अनुभूयन्ते ।

### 1.4.2.स्थूलप्रपंचोत्पत्तिः

पञ्चीकृतेभ्यो भूतेभ्यो चतुर्दशलोकानाम् उत्पत्तिः।

**एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवः स्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरिविद्यमाना-नामतलवितलसुतलरसातलतलातलमहातलपातालनामकानाम -धोऽधोविद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति । चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि। जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि । अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि । उद्भिजानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि । स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि ॥२०॥**

व्याख्या-एवं भूतारोपं ( पञ्चमहाभूतपृथिव्याद्यारोपं ) निरूप्य इह भौतिकारोपं (भूर्भुवःस्वराद्यारोपं) वर्णयति - एतेभ्य इति । एतावत्पर्यन्तं पृथिव्यादिपञ्चमहाभूतोत्पत्तिमुक्त्वा इदानीं तेभ्यः चतुर्दशभुवनादीनामुत्पत्तिप्रकारो निरूप्यते। प्राणिनां कर्मज्ञानफलभोगस्थानविशेषा यथा- पाठक्रमम् उपरि-उपरि वर्तमानाः सप्त । भूमेः अधोऽधश्च पाठक्रमेण वर्तमाना अतलादयः सप्त - इत्येवं चतुर्दशलोकाः । एते चतुर्दशलोका एव स्वावरण-

स्वरूपा लोकालोकपर्वततद्बाह्यपृथिवी तद्बाह्यसमुद्रः सहिता ब्रह्माण्डम् इत्युच्यते । पंचमहाभूतेभ्यः समुत्पन्ने ब्रह्माण्डे चतुर्विधस्थूलशरीराणां तद्योग्यान्नपानादीनां चोत्पत्तिर्भवति । चतुर्विधशरीराणां नामानि - जरायुजं, अण्डजम्,उद्भिज्जं, स्वेदजं चेति । यथोद्देशक्रमं शरीराणि निरूपयति - जरायुजानीत्यादिना।

### 1.4.3.स्थूलप्रपञ्चनिरूपणम्

जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि चतुर्विधशरीराणि।

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिवृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरमन्त्रकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च । स्थूलशरीरं जाग्रदिति च व्यपदिश्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादि प्रविष्टत्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते । तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रो-पेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशंकराच्युतैः क्रमा-न्नियन्त्रितेन मनोबुद्ध्यहंकारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचैत्तांश्च सर्वानेतान् स्थूलविषयान-नुभवतो "जागरितस्थानो बहिःप्रज्ञ" इत्यादिश्रुतेः । अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्त-दवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः । एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ २१॥

पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः।

व्याख्या - अत्रापि पूर्ववत् चतुर्विधस्थूलशरीरस्य एकत्वानेकत्वविवक्षायामेकानेकबुद्धि विषयतया वनवत् जलाशयवद् वा समष्टिर्व्यष्टिश्च। चतुर्विधशरीरसमुदायोऽपि शरीरमिति एकबुद्धिविषयतया वनवत् समष्टित्वं, स एव तत्तच्छरीराणीत्यनेकबुद्धिविषयत्वात् वृक्षवत् व्यष्टित्वं प्राप्नोतीत्यर्थः । भूरादिचतुर्दशभुवनान्तर्गतचतुविधस्थूलशरीर-

समष्ट्युपहितं चैतन्यं सकलप्राणिषु 'अहम्' इत्यभिमानेन वर्तते, अतो वैश्वानर इत्युच्यते, स ( वैश्वानरः) एव विविधं नानाप्रकारेण राजते ( प्रकाशते) इति कृत्वा विराट् इति संज्ञामपि लभते । उपहितस्य व्यपदेशानुक्त्वा उपाधेरपि व्यपदेशानाह- अस्यैषेति ।

अन्नविकारत्वात् आत्माच्छादकत्वाच्च अन्नमयकोशः।

अज्ञानस्य एषा सकलब्रह्माण्डान्तर्गतं चतुर्विधस्थूलशरीरसमष्टिः स्थूलशरीरम्, तदेव मातृपितृभुक्तान्नोत्पन्नत्वेन आत्माच्छादकत्वेन च अन्नमयकोशः सुखदुःखादिभोगाधारत्वेन च स्थूलशरीरम्, तत्तदिन्द्रियैः तत्तद्विषयोपलब्धेश्च जाग्रत् इत्युच्यते। चतुर्विधस्थूलशरीरसमष्ट्युपहितं चैतन्यं सप्रपञ्चमभिधाय अधुना तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते - एतद्व्यष्टीति । एतेषां चतुर्विध- स्थूलशरीराणां या व्यष्टिः तत्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं सूक्ष्मशरीराभिमानम् अजहत् प्रत्येकस्थूलशरीरे 'अहम्' इत्येवमभिमानेन वर्तमानं विश्व इति व्यवह्रियते । अस्य अज्ञानस्यापि इयं व्यष्टिः स्थूलशरीरम्, अन्नविकारत्त्वात् आत्माच्छादकत्वाच्च अन्नमयकोशः, इन्दियैर्विषयग्रहणात् जाग्रत् इत्युच्यते ।

अस्यां जाग्रदवस्थायां एतौ वैश्वानर-विश्वौ दिग्वायुसूर्यवरुणाग्निभिः क्रमशो नियन्त्रितेन श्रोत्रत्वक्चक्षुजिह्वाघ्राणेन्द्रियपञ्चकेन क्रमशः शब्द-स्पर्श- रूप- रस- गन्धान्, तथा अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमात् नियन्त्रितेन वाक्पाणिपादपायूपस्थेन्द्रियपंचकेन क्रमशः वचनादानगमनमलत्यागानन्दान्, एवमिन्द्रब्रह्मशंकरविष्णुभिः क्रमात् नियन्त्रितेन मनोबुद्धयहङ्कारचित्ताख्येन अन्तरिन्द्रियचतुष्केण क्रमशः सङ्कल्प-निश्चय-गर्व-स्मरणाख्यान् सर्वान् स्थूलविषयान् अनुभवतः । तथा च माण्डूक्योपनिषदि "जाग्रदवस्थावान् बाह्यविषयाणां प्रकाशकश्च वैश्वानर एव स्थूलविषयान् उपभुक्ते ।" - (माण्डू० उ० ३) इत्युक्तम् । अत्रापि उभयविधसमष्टि-व्यष्ट्योः तदुपहितवैश्वानर विश्वचैतन्ययोश्च वनवृक्षवत् तदवच्छिन्नाकाशवच्च, जलाशय-जलवत्

तत्प्रतिबिम्बिताकाशवच्च परस्परं न भेदः । अनेन प्रकारेण पञ्चीकृतमहाभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिर्भवति ।। २१ ।।

### 1.4.4.महाप्रपंचनिरूपणम्

**एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान्प्रपञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वान्तरजलाशयानां समष्टिरेको महान् जलाशयः । एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवद-वान्तरजलाशयगत प्रतिबिम्बाकाशवच्चैकमेव । आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्त-सदनुपहितं चैतन्यं "सर्व खल्विदं ब्रह्म" इति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः॥ २२ ॥**

सर्व खल्विदं ब्रह्म

व्याख्या -व्यष्टिभूतायाः कारणसृष्टेः सूक्ष्मसृष्टेः स्थूलसृष्टेश्च प्रत्येकविवक्षया अवान्तरप्रपञ्चत्वं निरूप्य इदानीं तेषां समष्टेरेव महाप्रपंचत्वं प्रदर्शयति। तत्र दृष्टान्तमाह-यथावान्तरेति । यथा खदिर-पलाश-घवादिवृक्षाणाम् अवान्तरवनानां समष्टिः समुदायविवक्षया एकं महद् वनं भवति, यथा च कूप-वापी-तडागादीनामवान्तरजलाशयानां समुदाय विवक्षया एको महान् जलाशयो भवति, तथैव स्थूल-सूक्ष्म-कारणाख्यानामवान्तर-प्रपञ्चानां समूहः एको महान् प्रपञ्चो भवति । यथा च अवान्तरवनावच्छिन्नाकाशवत् अवान्तरजलाशयगतप्रति-बिम्बाकाशवत् तथैव अवान्तरमहाप्रपञ्चोपहितानां विश्व-तैजस-प्राज्ञानां वैश्वानर-हिरण्यगर्भाव्याकृतानां च अभेदः ।

स्थूल-सूक्ष्म-कारणाख्यानामवान्तरप्रपञ्चानां समूहः एकः महाप्रपञ्चः।

निर्दिष्टेन महाप्रपञ्चेन तया तदुपहितचैतन्येन च अभिन्नं सत् अनुपहितं ( उपाधिरहितं ) चैतन्यं (विशुद्धं चैतन्यं) 'सर्वं खल्विदं ब्रह्म' इत्यस्य महावाक्यस्य वाच्यार्थः, तथा भिन्नं सत् लक्ष्यार्थो भवति । यथा अग्नौ प्रक्षेपेण प्रदीप्ताग्निरूपतां प्राप्तेन लोहेन दग्धः 'अहं लोहेन दग्धः' इत्याक्रन्दते। वस्तुतो दाहकता तु अग्निप्रयुक्तैव, न लोहप्रयुक्ता, प्रत्युत अग्निसम्पर्केणैव, अग्निलोहयोस्तादात्म्याध्यासः। तथैव महाप्रपञ्चेन तदवच्छिन्नचैतन्येन सह परस्परतादात्म्याध्यासापन्नं यदनुपहितं

चैतन्यं (विशुद्धं चैतन्यं) तदेव 'सर्वं खल्विदं ब्रह्म' इत्यस्य वाच्यार्थतां लभते तथा पूर्वोक्तेन प्रपञ्चेन विविक्तं ( भिन्नं) सत् तस्य महावाक्यस्य लक्ष्यार्थतां लभते।

सर्वं खल्विदं ब्रह्म।

'सर्वं खल्विदं ब्रह्म' अत्र सर्वस्य ब्रह्मरूपता प्रतिपाद्यते। तत्र सर्वम् अर्थात् महाप्रपंचः, तदुपहितं चैतन्यं, तदनुपहितं चैतन्यञ्च कथमेकं स्यादिति विचिकित्सायां मुख्यार्थस्य बाधः, इति लक्षणया सर्वं खल्विदम् इति विशेषणाशं परित्यज्य चैतन्यांशमात्रग्रहणेन महाप्रपञ्चोपहितचैतन्यस्य तदनुपहितचैतन्येन सह ऐक्यं निर्विवादमेव। यथा 'लौहपिण्डो दहति' इत्यस्य लक्षणया लौहपिण्डगतः अग्निर्दहति - इत्यर्थो भवति, तथैव सर्वस्य एतत्प्रपञ्चस्य ब्रह्मत्वाभावे 'सर्वं खल्विदं ब्रह्म' अस्मिन् वाक्येऽपि 'सर्वं खल्विदम्' इत्यस्य अंशस्य चैतन्यांशे लक्षणया सर्वप्रपंच-तद्गतचैतन्ययोश्च ऐक्यं सिद्ध्यति। एतावता प्रघट्टकेन ईश्वरचैतन्ये महाप्रपञ्चस्य आरोपप्रकारः सामान्यतया प्रदर्शितः । अर्थात् वस्तुनि चैतन्ये अवस्तुनः जडप्रपञ्चस्य आरोपः अध्यारोपः संक्षेपेण निरूपितः॥ २२॥

## Summarised Overview

अस्मिन् एकके जगत्कारणभूतं पञ्चीकरणं विशदरूपेण प्रतिपादितम्। पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम् । एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवः स्वर्महर्जनस्तपःसत्यमित्येतन्नाम-कानामुपर्युपरिविद्यमानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधोविद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचिता-नामन्नपानादीनां चोत्पत्तिर्भवति। अनन्तरं स्थूलप्रपञ्चोत्पत्तिः विशदीकरोति।

## Assignments

1.पञ्चीकरणम् प्रतिपादयत।
2.स्थूलप्रपञ्चोत्पत्तिं निरूपयत।
3. महाप्रपञ्चोत्पत्तिं विशदयत।
4. द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते” इति ।।व्याख्यात।
5.स्थूलप्रपञ्चं विशदयत।

## Suggested Readings


1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011


## References


1. *Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# Vedantasara - Concepts

# BLOCK 2

SGOU

UNIT 1

# पुत्रस्य आत्मत्वनिरासः

## Learning Outcomes

- वेदान्ततत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण द्वैतरूपात्मतत्त्वानां निषेधं जानाति।

## Background

अद्वैतवेदान्तस्य प्रमुखं तत्त्वं भवति जीवो ब्रह्मैव नापरः इति। ब्रह्मणः स्वरूपं किम् इति विषये दार्शनिकानां मध्ये मतभेदाः सन्ति। नानाशास्त्राणि आत्मनः स्वरूपं विविधप्रकारैः प्रतिपादयन्ति। आत्मनः स्वरूपविषये एव अस्मिन् एकके विचारः क्रियते।इतरदार्शनिकाः आत्मा पुत्रः, स्थूलशरीरम्, इन्द्रियाणि, प्राणः, मनः,बुद्धिः, इत्यादि रूपेण वदन्ति। आत्मनः तानि स्वरूपाणि निरस्य वेदान्तशास्त्रानुसारं सच्चिदानन्दमद्वयरूपं आत्मस्वरूपं अत्र स्थापयति।

## Keywords

पुत्रादीनां आत्मत्वं, स्थूलशरीरं, इन्द्रियाणि, मनः, प्राणः, बुद्धिः, अज्ञानोपविष्टं चैतन्यं, सच्चिदानन्दं, अद्वयं, ब्रह्म।

## Discussion

### 2.1.1.पुत्रादीनां आत्मत्वसाधनम्

पुत्रादीनां आत्मत्वस्य विविधाः पक्षाः।

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते। अतिप्राकृतस्तु "आत्मा वै जायते पुत्र" इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमय" इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः "ते ह प्राणाः प्रजापति पितरमेत्य ब्रूयुः" इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनु-भवाच्चेन्द्रियाण्यात्मेति वदति । अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणामय' इत्यादि श्रुतेः प्राणाभाव इन्द्रियादिचलना-योगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति। अन्यस्तु चार्वाकः "अन्योऽन्तर आत्मा मनोमय' इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति । बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमय" इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्राभाकरतार्किकौ तु "अन्योऽन्तर आत्मानन्दमय" इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्या-द्यनुभवाच्चाज्ञानमात्मेति वदतः । भाट्टस्तु "प्रज्ञानघन एवानन्दमय" इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहित चैतन्यमात्मेति वदति । अपरो बौद्धः "असदेवेदमग्र आसीत्" इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च, शून्यमात्मेति वदति ॥२३॥

सामान्यतः ईश्वरचैतन्ये महाप्रपञ्चस्य अध्यारोपप्रकारः पूर्वं सविस्तरमभिहितः। इदानीं प्रत्यगात्मनि 'अयमात्मा, अयमात्मा'

इति विशेषारोपप्रकारं दर्शयितुमुपक्रमते-इदानीमित्यादिना । इदमिदमिति अध्यारोपमाह । प्रत्यक्षादिसन्निहितस्य अपत्यादेः इदमिति निर्देशः ।

१. अतिप्राकृताः स्थूलबुद्धयो लोकाः "आत्मा वै जायते पुत्रः" इति श्रुतिप्रमाणेन, स्वसुतेऽपि स्वदेहनिर्विशेषप्रेम्णा अर्थात् स्वशरीरे प्रेमदर्शनात् आत्मत्वभ्रमः एवं - इति युक्त्या, पुत्रे पुष्टे नष्टे च अहमेव पुष्टो नष्टो वा जातः स्वपुत्रादिशरीरेऽपि प्रेमदर्शनात् आत्मत्वभ्रमः इत्यनुभवेन च पुत्रमेव 'अहं' पदवाच्यं प्रत्यक् चैतन्यं कथयन्ति ।

२. एतदपेक्षया विशिष्टबुद्धिरन्यः चार्वाकः कथयति - स्थूलशरीरमेव आत्मा, न पुत्रादिः यतः अग्निना गृहे प्रदीप्ते सति पुत्रादिकं परित्यज्यापि स्वशरीररक्षणेच्छया तस्माद् गृहाद् बहिर्निर्गच्छति इति युक्त्या पुत्राद्यपेक्षया स्वशरीरे मोहाधिक्यं दृश्यते । अत्र विषये चार्वाकाः 'स वा एष पुरुषोऽन्नरसमयः' इति श्रुतिप्रमाणेन, तथा 'अहं स्थूलः' 'अहं कृशः' इति अनुभवेन च स्वस्थूलशरीरे एव आत्मत्वं प्रतीयते । पुत्रस्य आत्मत्वाऽभावे युक्त्यनुभवश्रुतिप्रमाणादिकं दर्शयन्नयं चार्वाकः पूर्वोक्तात् अतिप्राकृतात् आत्मनो वैलक्षण्यं दर्शितवान् ।

स्थूलशरीरमेव आत्मा इति चार्वाकः।

३. ततोऽप्युत्कृष्टः कोऽपि लोकायतचार्वाकः युक्त्यनुभव श्रुतिभ्यः इन्द्रियाणि आत्मा इति वदति सुषुप्त्यवस्थायां निश्चेष्टावस्थायाञ्च सर्वेषामिन्द्रियाणां व्यापारे विरते सति इदं शरीरं न किमपि गमनागमनादिव्यापारं कर्तुं प्रभवति - इति तत्र युक्तिः । 'काणोऽहं, बधिरोऽहम्' इति तत्रानुभव, एतदतिरिच्य 'ते ह प्राणाः प्रजापति पितरमेत्य ब्रूयुः' इति श्रुतिरपि प्रमाणम् । प्रजापतेः सन्निधौ गमनं, कथनञ्चैतत्सर्वम् अचेतने नैव सम्भवति इन्द्रियव्यापारेणैव शरीरस्य गमनादिकं सम्भवति, अतः इन्द्रियाण्येवात्मा इति प्रतीयते ।

४. ततोऽप्युत्कृष्टतरः कोऽपि प्राणात्मवादी चार्वाकः युक्त्यनुभवश्रुतिबलात् प्राण एव आत्मा इत्याह । स कथयति....

न शरीरं, नापि च इन्द्रियाणि आत्मा, किन्तु तद्भिन्नाः प्राणा एव प्रत्यगात्मा तैर्विना शरीरस्य इन्द्रियाणां वा व्यापारो न भवति, अतः तदतिरिक्तः कश्चिदस्ति यः साधनभूतैरेभिः शरीरेन्द्रियैः कर्म करोति - इति युक्तिः, 'अन्योऽन्तर आत्मा प्राणमयः' - इति तत्र श्रुतिः, तथा 'बुभुक्षितोऽहं', 'पिपासितोऽहम्' - इति तत्राऽनुभवोऽपि ।

मनः आत्मा इति आत्मवादी चार्वाकः।

५. ततोऽपि विशिष्टः कश्चन मन आत्मवादी चार्वाकः युक्त्यनुभवश्रुतिबलात् मन एवात्मा इत्याह । स वदति- 'प्रत्येकज्ञाने प्राणादिभिः सह मनसंयोगः अत्यावश्यकः इति मनसि सुप्ते प्राणाः न किञ्चित् कर्तुं समर्थाः इति युक्तिः । 'सङ्कल्पमहं करोमि' 'विकल्पमहं करोमि' - इति अनुभवः । "अन्योऽन्तर आत्मा मनोमयः" - इति श्रुतिः ।

६. उपयुक्तेभ्यः पञ्चभ्यो विलक्षणः योगाचारमतावलम्बी कश्चिद् विज्ञानवादी बौद्धः बुद्धिमेव प्रत्यक्चैतन्यं वदति । तदुपकरणरूपाणि मन इन्द्रियाणि च कर्त्रभावे केवलं करणं कार्यसम्पादने समर्थं न भवति, इति तत्र युक्तिः । 'अहं कर्ता, अहं भोक्ता' - इत्यनुभवोऽपि तत्रास्ति । तथा 'अन्योऽन्तर आत्मा विज्ञानमयः' - इति श्रुतिरपि तत्र प्रमाणम् । एवञ्च युक्त्यनुभवश्रुतिबलेन ज्ञायते यत् शरीरेन्द्रियापेक्षया अन्य एव कश्चित् कर्ता स्वकृतकर्मणः फलस्य भोक्ता च वर्तते, स च बुद्धिरेव। अतो बुद्धिरेव आत्मा (प्रत्यक् चैतन्यम् ) अस्ति ।

उक्तेभ्यः अतिरिक्तौ प्राभाकर-तार्किकौ स्वमतानुकूलश्रुत्यादिबलात् 'अज्ञानमेवात्मा' इति वदतः ।

प्राभाकरमतानुयायिनो मीमांसकास्तार्किकाश्च वदन्ति-बुद्धि-सुख-दुःखेच्छादीनामज्ञाने (ज्ञानभिन्ने आत्मनि) लयः, - इति युक्तिः । 'अहमज्ञः, अहमज्ञानी' इत्यनुभवः । "अन्योऽन्तर आत्मानन्दमयः" - (तैत्ति० २।५।१) इति श्रुतिः। एवञ्च युक्त्यनुभवश्रुतिबलात् 'अज्ञानमेवात्मा' इति ।

कुमारिलभाट्टसम्प्रदायानुयायिनो मीमांसकाः कथयन्ति -

'अज्ञानोपहितं चैतन्यमेवात्मा' इति । यतः मनसः इन्द्रियाणां च व्यापारः- सुषुप्तिकाले न भवति । मनसः इन्द्रियाणां च व्यापारद्वारा समुत्पन्नेन ज्ञानेन जायमानः परामर्शोऽपि (सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्) तदानीं न भवति, किन्तु स्वापादुत्थितस्य स परामर्शो भवति । सुषुप्तो अन्यस्य कस्यचित् अभावात् । एवञ्च सुषुप्तौ अज्ञानस्य ज्ञानस्य चास्तित्वेन प्रकाशाप्रकाशसद्भावः - इति युक्तिः । 'मामहं न जानामि' इत्यनुभवः । 'प्रज्ञानघन एवानन्दमयः' - (माण्डू० ५) इति श्रुतिः। तस्माद् युक्त्यनुभवश्रुतिबलात् अज्ञानोपहितं चैतन्यम् आत्मा इति । अस्मिन् जायमाने परामर्शे सुखमहमस्वाप्समिति ज्ञानांशस्य प्रकाशकत्वात् सुषुप्तिदशायां प्रकाशसद्भावः, तथा न किञ्चिदवेदिषम् इत्यत्र ज्ञानाभावत्त्वदर्शनात् अप्रकाशसद्भावः । एवं सुषुप्तो प्रकाशाप्रकाशयोरुभयोः स्थितिः । तथैव मामहं न जानामि - इत्यनुभवेऽपि द्वावशौ स्तः एकः कर्त्रंशः, अन्यश्च ज्ञानांशः। तेन ज्ञानापेक्षया ज्ञाता अन्यः इति स्पष्टं भवति । स एव ज्ञाता अज्ञानोपहितः चैतन्यरूप एव आत्मा इति ।

अज्ञानोपहितं चैतन्यमेवात्मा

माध्यमिकमतानुयायिनो बौद्धाः कथयन्ति 'असदेवेदमग्र आसीत्'- (छा० उ० ६।२।१) नामरूपात्मकमिदं जगत् सृष्टेः पूर्वम् असत् (शून्य) एव आसीत् इति श्रुतिः । सुषुप्तौ न किञ्चित् तिष्ठति इति युक्तिः । सुषुप्तेः पश्चात्, प्रबुद्धस्य 'सुषुप्तौ अहं नासम्' इति निजाभासपरामर्शविषयकः अनुभवोऽपि भवति । अतः श्रुतियुक्त्यनुभवबलेन सर्वाभावात्मक शून्यमेव आत्मा इति । उपर्युक्तानुभवबलेन च आत्मनो द्रव्यात्मकत्वं (अप्रकाशकत्वं), तथा बोधात्मकत्वं (प्रकाशात्मकत्वं) च नाभ्युपगन्तव्यम् । अपि तु सर्वाभावरूपशून्यत्वमेवात्मनः सिद्ध्यति ।

### 2.1.2.पुत्रादीनामनात्मत्वप्रतिपादनम्

एतेषां पुत्रादीनामनात्मत्वमुच्यते । एतैरतिप्राकृत्तादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवा-भासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव । किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादि प्रबल श्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधित्तत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव । अतस्तत्तद्भासक नित्यशुद्धबुद्धमुक्तसत्यस्वभाव प्रत्यक् चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः । एवमध्यारोपः ॥२४॥

व्याख्या - इदानीं पुत्रादिशून्यपर्यन्तानामात्मत्वप्रतिपादकश्रुत्यादेः आभासत्वात् पूर्व पूर्वमतस्थ उत्तरोत्तरमतबाध्यत्वाच्च दृश्यत्वं जडत्वादिहेतुसमूहैश्च अनात्मकत्वं प्रसिद्धमेवेति अत्र प्रतिपादयति। पूर्ववादिभिः पुत्रादीनामात्मत्वसाधनार्थं प्रमाणरूपेण उपस्थापितानां श्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरमुपस्थापितैः श्रुतियुक्त्यनुभवाभासः स्वयमेव परिहारः समभवत् इति पुत्रादिशून्यपर्यन्ते अनात्मत्वे सिद्धेऽपि 'कस्तार्हि अहम्प्रत्ययविषयः आत्मा ? इति सन्देहः स्थिर एव । अतस्तदपाकरणाय वक्ष्यमाणाभिः श्रुतिभिः प्रमाणीक्रियते यत् पुत्रादीनामात्मत्वसाधनार्थं याः श्रुतयः प्रमाणरूपेण वादिभिरुपस्थापिताः ताः सर्वा वक्ष्यमाणाभिः श्रुतिभिर्बाध्यन्ते । तेन पुत्रादिशून्यपर्यन्तानामात्मत्वं कथमपि न सिद्धमर्हति, अपि तु अहं प्रत्ययविषयः आत्मा, तद्व्यतिरिक्त एव वर्तते ।

नित्यशुद्धबुद्धमुक्तसत्य स्वभाव प्रत्यक् चैतन्यमेवात्मवस्तु इति वेदान्तसिद्धान्तः

अपि च अनल्पाः श्रुतयः पुत्रादिशून्यपर्यन्तस्य सर्वस्य जडत्वात् तदपेक्षया व्यतिरिक्त एवायमात्मेति प्रतिपादयन्ति । जडेषु तु चैतन्याभासमात्रमेवेति सर्वेषु अनित्यत्वम् । अतो जडपदार्थप्रकाशकम् 'अहं ब्रह्मास्मि' इति विद्वदनुभूतं, अतिसिद्धं,

नित्यशुद्धबुद्धमुक्तस्वभावश्च प्रत्यक् चैतन्यमेव अहम्पदवाच्य आत्मेति सिद्ध्यति।

ननु काचिच्छ्रुतयः पुत्रादिशून्यपर्यन्तानामात्मत्वं प्रतिपादयन्ति, काचिच्च तेषामनात्मत्वं प्रतिपादयन्ति, उभयोरेव प्रामाण्यं श्रुतित्वाऽविशेषात् । ततः पुत्राद्यनात्मत्वसाधक श्रुतीनामेव प्रामाण्यं, तदात्मत्वसाधकश्रुतीनाञ्च अप्रामाण्यं कुतो नाभ्युपगम्यते ? विनिगमनाविरहात् इति चेत् उच्यते- श्रुतित्वावच्छिन्नायाः समस्तश्रुतेरेव स्वतः प्रामाण्याभ्युपगमात् सर्वाण्यपि श्रुतिवचनानि प्रमाणमित्यत्र नास्ति संशयः । तत्रैव बोध्यम् पुत्रादिशून्यपर्यन्तानामात्मत्वप्रतिपादकश्रुतीनां 'अस्थूलम्, अमनाः अकर्ता' इत्यादिश्रुतिविरोधेन स्वार्थ तात्पर्यं न किमपि भवति, अपितु स्थूलारुन्धतीन्यायेन सूक्ष्म सूक्ष्मतरवस्तुबोधने एव तासां तात्पर्यम्। अनेन प्रकारेण साक्षात् परम्परया वा तस्यैव अद्वितीयब्रह्मणः प्रतिपादकत्वात् सर्वासामपि श्रुतीनां प्रामाण्यमिति न कोऽपि विरोधः । सूक्ष्मातिसूक्ष्मः चेतनस्वरूपः श्रुतिप्रतिपादितः आत्मा स्वयं प्रकाशः । घटपटादिजडपदार्थस्तु स्वप्रकाशार्थं प्रकाशमपेक्षते। किन्तु आत्मप्रकाशनार्थं न प्रकाशान्तरपेक्षा तस्य चेतनत्वात् 'अत्रायं पुरुषः स्वयं ज्योतिः', 'आत्मैवास्य ज्योतिः', इत्यादि-श्रुतयः आत्मनः स्वयंप्रकाशत्वे प्रमाणम् । स चैकोऽपि अनेकत्र वर्तमानः इत्यत्र 'एको देवः बहुधा सन्निविष्टः', इत्यादिश्रुतयः प्रमाणम् । एवञ्च देहेन्द्रिय - प्राणमनोबुद्ध्यादिविलक्षणः तदध्यक्षश्चात्मा भिन्न एव । स एव कर्मफलमुपभुङ्क्ते । शुद्धचैतन्यन्तु एतद्व्यतिरिक्तम्, तेन सह अस्य चैतन्यस्य ऐक्यम्।

आत्मैवास्य ज्योतिः इत्यादि श्रुतयः आत्मनः स्वयंप्रकाशकत्वे प्रमाणम्।

आत्मचैतन्यं तावत् जाग्रत्-स्वप्नसुषुप्त्यवस्थासु अन्नमय-मनोमय-प्राणमय- विज्ञानमयानन्दमयकोशेषु उपलभ्यते, किन्तु शुद्धचैतन्यम् एतस्मात् सर्वथा परम् एवमेव स्थूल-सूक्ष्म-कारणशरीरव्यष्ट्यभिमानिचैतन्यं (जीवः) विश्वः, तैजसः, प्राज्ञः इत्युच्यते । तथा तच्छरीरसमष्ट्यभिमानिचैतन्यं (ईश्वरः) वैश्वानरः ( विराट् ) सूत्रात्मा (हिरण्यगर्भः) ईश्वरश्चोच्यते । न

चायमात्मा अणुपरिमाणवान् सकलशरीरव्यापिचैतन्यानुपलंभप्रसङ्गात्, नापि मध्यमपरिमाणः सावयवत्वेन अनित्यत्वप्रस्ङ्गात्, किन्तु स्वतस्तावत् अखण्डब्रह्मात्मस्वभावत्वात् "स वा एष महानज आत्मा" - (बृह० उ० ४।४।२२) इत्यादिश्रुतयः ते च परममहत्परिमाण एव । संसारित्वावस्थायामेव तस्य उपाधिनिबन्धनं परिच्छिन्नपरिमाणं, तच्च यथोपाध्यनुरूपत्वादनियतम् ।

## Summarised Overview

अस्मिन् एकके प्रथमम् आत्मनः पुत्रादिवत्वप्रतिपादकान् विविधान् वादान् प्रतिपादिताः। तदनुसारं अतिप्राकृतस्तु "आत्मा वै जायते पुत्र" इत्यादिश्रुतेः पुत्रः आत्मेति वदति। चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमय" इत्यादिश्रुतेः स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः "ते ह प्राणाः प्रजापति पितरमेत्य ब्रूयुः" इत्यादिश्रुतेः इन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणमय' इत्यादि श्रुतेः प्राणः आत्मेति वदति।एवं विविधदार्शनिकाः आत्मनः स्वरूपं विविधरूपेण वदन्ति।

एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव । अतस्तत्तद्भासक नित्यशुद्धबुद्धमुक्तसत्यस्वभाव प्रत्यक् चैतन्य-मेवात्मवस्त्विति वेदान्तविद्वदनुभवः।

## Assignments

1.पुत्रादीनां आत्मत्वं प्रदर्शयत।
2.चैतन्यविषये बौद्धानां पक्षं विशदयत।
3.पुत्रादीनां अनात्मत्वं वेदान्तसारदिशा समर्थयत।
4.आत्मनः स्वरूपं विशदयत।



SGOU

## Suggested Readings

1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वाराणासी, 2011

## References


*1.Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# महावाक्यनिरूपणम्

## Learning Outcomes

- वेदान्ततत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- महावाक्यानां आशयं गृह्णाति।

## Background

उपनिषत्सु वर्तमानानि चतुर्महावाक्यानि वेदान्ततत्त्वानां साराः भवन्ति। ऐतरेयोपनिषदि प्रज्ञानं ब्रह्म, माण्डूक्योपनिषदि अयमात्मा ब्रह्म, छान्दोग्योपनिषदि तत्त्वमसि, बृहदारण्यकोपनिषदि अहं ब्रह्मास्मि च चत्वारि महावाक्यानि। एषु महावाक्येषु तत्त्वमसि, अहं ब्रह्मास्मि इत्यनयोः वाक्ययोः विचारः वेदान्तसारे विस्तरेण प्रतिपाद्यते। अस्मिन् एकके तत् विस्तरेण पठामः।

## Keywords

तत्त्वमसि, अहं ब्रह्मास्मि, सामानाधिकरण्यम्, विशेषणविशेषता, लक्ष्यलक्षणसंबन्धः, जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा।

## Discussion

2.2.1.संबन्धत्रयम्

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मल-

क्षणयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तम्---

"सामानाधिकरण्यं च विशेषणविशेष्यता । लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥" इति ।

संबन्धत्रयेण अखण्डार्थबोधकम्।

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्काल विशिष्टदेवदत्तवाचकायं शब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः। तथा च तत्त्वमसीतिवाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्ट चैतन्यवाचकत्वम्पदस्य चैकस्मिन् चैतन्ये तात्पर्यसम्बन्धः । विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थो तत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वाविरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । इयमेव भागलक्षणेत्युच्यते ॥ २७ ॥

व्याख्या - वाक्यार्थज्ञाने पदार्थज्ञानं कारणमिति कृत्वा 'तत्त्वमसि' इत्यस्य महावाक्यस्य अर्थं प्रतिपादयितुमिच्छया ग्रन्थकारः प्रथमतः 'तत्त्वमसि' इति महावाक्यान्तर्गतं 'तत्-त्वम्' पदार्थं

अखण्डार्थप्रतिपादकम्

सविस्तरं निरूप्य इदानीं 'तत्त्वमसि' इति महावाक्यार्थं निरूपयितुमाह- अथेति । अत्रेयं जिज्ञासा उत्पद्यते, यत् जीवस्तावत् अल्पज्ञः ईश्वरश्च सर्वज्ञः । अतः द्वावपि परस्परमत्यन्तं भिन्नौ ( विरुद्धौ), तदा उभयोरैक्यप्रतिपादकस्य 'तत्त्वत्मसी' तिमहावाक्यस्थापि विरुद्धार्थकत्वात्, कथमिव तत् महावाक्यं अखण्डैकरसस्य ब्रह्मणः प्रतिपादकं भवेत् इति संशयः भविष्यति । यद्यपि तत्त्वत्मसीति महावाक्यं अभिधया साक्षात् अखण्डैकरसस्य ब्रह्मणः प्रतिपादकं न भवति तथापि लक्षणया त्रिभिः सम्बन्धः अखण्डार्थप्रतिपादकं भवति । त्रयाणां सम्बन्धानां स्वरूपमाह -(१) पदयोः (तत्त्वंपदयोः) सामानाधिकरण्यम्, (२) पदार्थयोः ( परोक्षत्वाऽपरोक्षत्वादि विशिष्टचैतन्ययोः) - विशेषण-विशेष्यभावः । (३) परोक्षत्वाऽपरोक्षत्वादिविशिष्टत्वरूपविरुद्धांशस्य परित्यागपूर्वकं 'तत्त्वं' पदलक्ष्यार्थरूपेण अविरुद्धचैतन्येन सह (तत्त्व) पदयोः तदर्थयोर्वालक्ष्यलक्षणभावः ।

'तत्' पदस्य मुख्योऽर्थः- परोक्षत्व सर्वज्ञत्वादिधर्मविशिष्टं चैतन्यम् । 'त्वम्' पदस्य मुख्योऽर्थः - अपरोक्षत्व किञ्चिज्ज्ञत्वा-दिधर्मविशिष्टं चैतन्यम् ।

इमौ द्वावपि अर्थौ परस्परं विरुद्धौ अर्थात् उभयोरपि चैतन्ययोः परोक्षत्वाऽपरोक्षत्वादिधर्मौ मिथो विरुद्धौ स्तः । लक्षणया अर्थबोधनावसरे 'तत्' पदं, 'त्वम्' पदञ्च विरुद्धधर्मपरित्यागपूर्वकं अथवा तत्पदार्थः, त्वम्पदार्थो वा विरुद्धधर्मपरित्यागपूर्वकं अखण्डार्थमेव बोधयतः । अतः तत्पदं त्वम्पदं च लक्षणरूपम्, अखण्डचैतन्यं च ताभ्यां पदाभ्यां लक्षणया बोध्यते, अतः अखण्डचैतन्यं लक्ष्यरूपम् ।तत्र नैष्कर्म्यसिद्धौ उक्तम्-

**"सामानाधिकरण्यञ्च विशेषण-विशेष्यता ।**

**लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥"**

( नैष्कर्म्यसिद्धिः. ३।३)

एतत् तत्त्वमसीति वाक्यं सम्बन्धत्रयेण यथा अखण्डार्थम्प्रतिपादयति, तत् 'सोऽयं देवदत्तः' इति लौकिकोदाहरणेन सह अत्र प्रदर्शयति । पदयोः सामानाधिकरण्य यथाभिन्नप्रवृत्तिनिमित्तयोः शब्दयोः एकस्मिन् अर्थ प्रवृत्तिः सामानाधिकरण्यम् । तच्च सामानाधिकरण्यं 'सोऽयं देवदत्तः' अस्मिन् लौकिकवाक्ये इत्थं घटते- अत्र सः, अयम्, देवदत्तः इति त्रीणि पदानि । तत्र 'सः' शब्दस्य (तत्- पदस्य) प्रवृत्ति-निमित्तं (प्रवृत्ती हेतुभूतं) तद्देशतत्कालवैशिष्ट्यमस्ति । 'अयम्' शब्दस्य (इदं पदस्य) प्रवृत्तिनिमित्त (प्रवृत्तो हेतुभूत) एतद्देशतत्कालवैशिष्ट्यमस्ति । अर्थात् 'स' शब्दस्य तद्देश तत्कालविशिष्टरूपेऽर्थे प्रवृत्तिः । 'अयं'- शब्दस्य च एतद्देशैतत्कालविशिष्टरूपेऽर्थे प्रवृत्तिः । तथा च भिन्न-प्रवृत्ति- निमित्तयोः 'सोऽयंशब्दयोः' एकस्मिन् देवदत्तपिण्डे तात्पर्य-सम्बन्धः सामानाधिकरण्यमित्यर्थः । तथैव 'तत्त्वमसी'ति वाक्येऽपि 'परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्य' तत्पदप्रवृत्तिनिमित्तम् । 'अपरोक्षत्वकिञ्चिज्ज्ञत्वादिवैशिष्ट्य' त्वम्पदप्रवृत्तिनिमित्तम् । तथा च भिन्नप्रवृत्तिनिमित्तयोः 'तत्त्वम्'पदयोः एकस्मिन् चैतन्ये तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः ।

एकस्मिन् चैतन्ये तात्पर्यसंबन्धः सामानाधिकरण्यमित्यर्थः।

विशेषण-विशेष्यभावसम्बन्धस्वरूपमाह-विशेषणेति । विशेषणं व्यावर्तकं भवति । विशेष्य व्यावर्त्यं भवति । तथाच 'सोऽयं देवदत्तः' इति वाक्ये एव अयं शब्दवाच्यः योऽसौ एतत्कालैतद्देशसम्बन्धविशिष्टो देवदत्तपिण्डोऽयम्, 'स इति'

तच्छब्दवाच्यात् तत्कालतद्देशविशिष्टदेवदत्तपिण्डात् भिन्नो न इति; यदा प्रतीयते, तदा तच्छब्दार्थस्य अयंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वम् । अयंशब्दार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम् । तथैव स इति तच्छब्दवाच्यः तत्काल तद्देशविशिष्टः देवदत्तपिण्डः, सोऽयमिति इदंशब्दवाच्यात् एतत्कालैतद्देशसम्बन्धविशिष्टात् अस्मात् देवदत्तपिण्डात् न

भिद्यते इति यदा ज्ञायते, तदा अयंशब्दवाच्यार्थस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं, तच्छब्दार्थस्य व्यावर्त्यत्वादविशेष्यत्वम्। तथा च 'अयमेव सः, स एवायम्' इति अन्योऽन्यभेदव्यावर्तकतया 'सोऽयंशब्दार्थयोः परस्परं विशेषण-विशेष्यभावो भवति । उक्तं विशेषणविशेष्यभावं दार्ष्टान्तिके तत्त्वमसीति वाक्ये योजयति-तथाऽत्रापीति। अत्रापि 'तत्त्वमसि' वाक्येऽपि 'त्वम्' पदवाच्यं यत् अपरोक्षत्व-किञ्चि-ज्ज्ञत्वादिविशिष्टं चैतन्यं, तत्पदवाच्यात् सर्वज्ञत्वादि-विशिष्टचैतन्यात् न भिद्यते इति यदा ज्ञायते, तदा तच्छब्दार्थस्य त्वम्पदार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं, स्वम्पदार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम् । तथैव तत्पदवाच्यं यत् सर्वज्ञत्वादिविशिष्टचैतन्यं, तत् त्वम्पदवाच्यात् किचिज्ञत्वादिविशिष्टचैतन्यात् न भिद्यते इति यदा प्रतीयते तदा त्वम्पदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं, तत्पदार्थस्य व्यावर्त्यत्वात् विशेष्यत्वम् । तथाच 'त्वं तत् असि' 'तत् त्वम् असि' इति तत्-त्वम्पदार्थयोः परस्परं भेदव्यावर्तकत्वेन परस्पर विशेषण-विशेष्यभावसम्बन्धो भवति ।

विशेषणविशेष्यभावसम्बन्धः

अवसरप्राप्तं लक्ष्य-लक्षणभावसम्बन्धस्वरूपं निरूपयितुमाह-लक्ष्येति। असाधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यम्, तत्प्रतिपाद्यमवशिष्ट वस्तु लक्ष्यम् । तथा च 'सोऽयं देवदत्तः' अस्मिन्नेव वाक्ये सोऽयंशब्दयोः तदर्थयोर्वा विरुद्ध- तत्कालतद्देश विशिष्टतत्कालैतद्देश विशिष्टत्वपरिहारेण अविरुद्धदेवदत्तत्व-विशिष्ट देवदत्तपिण्डेन सह देवदत्तविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावसम्बन्धो भवति । अर्थात् विरुद्धांशपरित्यागेन सोऽयंशब्दयोः तदर्थयोर्वा अविरुद्ध देवदत्तपिण्डेन सह लक्ष्य-लक्षणभावसम्बन्धः । अस्मिन् वाक्ये तच्छब्दस्य तत्काल-तद्देशैविशिष्टरूपः अर्थः, इदंशब्दस्य च एतत्कालैतद्देशविशिष्ट रूपोऽर्थः इत्यनयोर्विरुद्धार्थकत्वेऽपि तत्कालतद्देशतत्कालै-तद्देशरूपविरुद्धांशपरित्यागेन

अविरुद्धदेवदत्तपिण्डरूपैकार्थावबोधकतया सोऽयं पदयोर्लक्षणत्वम्, देवदत्तपिण्डस्य च लक्ष्यत्वम्। अनेनैव प्रकारेण तत्त्वमसीत्यत्रापि तत्त्वंपदयोस्तदर्थयोर्वा परोक्षत्वाऽपरोक्षत्वसर्वज्ञत्वाल्पज्ञत्वादिरूप विरुद्धांशपरित्यागेन अविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः सम्बन्धो भवति । परित्यक्तविरुद्धांशयोः तत्त्वं पदयोः पदार्थयोर्वा लक्षणत्वम्, अखण्डचैतन्यस्य च लक्ष्यत्वम् एवमत्र विरुद्धां- शपरित्यागेन यत् अविरुद्धचैतन्यावबोधकत्वं तत् केवलं संज्ञाभेदेन भागलक्षणा (भागत्यागलक्षणा) जहदजहल्लक्षणा चोच्यते। अत्र केवलं संज्ञाभेदः, न वस्तुभेदः ॥ २७ ॥

भागलक्षणा जहदजहल्लक्षणा रूपेण ज्ञायते।

### 2.2.2.जहल्लक्षणानिरूपणम्

अत्र गङ्गायां घोषः प्रतिवसतीतिवाक्यवज्जहल्लक्षणापि न सङ्गच्छते । तत्र तु गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते। अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्ज- हल्लक्षणा न संगच्छते । न च गंगापदं स्वार्थपरित्यागेन तीर- पदार्थं यथा लक्षयति तथा तत्पदं त्वम्पदं वा स्वार्थपरित्यागेन त्वम्पदार्थ तत्पदार्थ वा लक्षयत्वतः कुतो जहल्लक्षणा न संगच्छत इति वाच्यम् । तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्।

### 2.2.3.अजहल्लक्षणानिरूपणम्

तत्त्वमसि इति महावाक्ये अजहल्लक्षणा अपि न सङ्गच्छते -

अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न सम्भवति। तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्यकस्यचिदर्थस्य लक्षितत्वेपि तद्विरोधपरिहारा-

सम्भवादजहल्लक्षणा न सम्भवत्येव । न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणांगीकरणमिति वाच्यम्। एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्य- पेक्षाभावाच्च ॥ ३० ॥

### 2.2.4.जहदजहल्लक्षणा-निरूपणम्

जहदजहल्लक्षणया तत्त्वमसि महावाक्यसमर्थनम्।

यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्काल विशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वात्परोक्षत्वादिविशिष्ट चैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ॥ ३१ ॥

### 2.2.5.अनुभववाक्यार्थः

अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते । एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थों शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्ध बुद्धमुक्त सत्यस्वभावापरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति । सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते । तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति । तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासमानर्हतया तेनाभिभूत सत्स्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यग -भिन्नपरब्रह्ममात्रं भवति ॥ ३२ ॥

**व्याख्या-** यदा श्रोत्रियो ब्रह्मानिष्ठो गुरुः अध्यारोपापवादन्यायेन तत्त्वमसीत्येतद्घटक 'तत्त्वं" पदार्थौ सम्यगवबोध्य अधिकारिणं

शिष्यं तत्त्वमसीतिवाक्येन अखण्डार्थत्वमवबोधयति तदा 'अहं प्रत्यगात्मा परब्रह्म अस्मि' इति अधिकारिणः शिष्यस्य चित्तवृत्तिरुत्पद्यते । अर्थात् देहेन्द्रियादिसकलदृश्यविलक्षणस्य प्रत्यगात्मनो जीवाख्यचैतन्यस्य विशुद्धेन परमात्मचैतन्येन सह एकत्वं विज्ञाय अहं ब्रह्मास्मि इति वाक्यार्थमनुस्मरन् स्वात्मलक्षणमखण्डमानन्दमनुभवतीत्यर्थः । ब्रह्मणि अनित्यत्वशङ्कां निराकरोति-नित्येति । शुद्धपदम् अविद्यादिदोषराहित्यं सूचयति । बुद्धपदं स्वप्रकाशस्वरूपत्वेन जाड्यादिकं व्यवच्छिनति । मुक्तपदं सर्वोपाधिराहित्यं सूचयति । सत्यमिति अविनाशिस्वभावत्वं सूचयति । परमानन्दपदं वैषयिकमनुष्यानन्दादिचतुर्मुखब्रह्मानन्दपर्यन्तानां कर्म-जन्यतया सातिशयत्वेन तुच्छत्वात् तेभ्यो विलक्षणं निरतिशयानन्दस्वरूपत्वं प्रतिपादयति । अनन्तपदं घटादिवत् परिच्छेदराहित्येन देशत कालतः वस्तुतश्च अपरिच्छिन्नत्वं बोधयति । अद्वयपदं नानात्वनिषेधेन एकत्वम् अवगमयति । ननु यथा प्रदीपप्रभा रविमण्डलं न व्याप्नोति न च प्रयोजनास्त तथा नित्यशुद्धबुद्धमात्मानं जडा चित्तवृत्तिः कथं विषयीकृत्य उत्पद्यते किं प्रयोजनश्चेत्याशङ्क्याह-सात्विति। सा चित्तवृत्तिः न शुद्धब्रह्मविषयिणी,किन्तु अज्ञानविशिष्ट प्रत्यग-भिन्नपरब्रह्मविषयिणी अर्थात् कार्यब्रह्म (सोपाधिकब्रह्म) विषयिणीत्यर्थः । सा च चैतन्यप्रतिबिम्बसम्वलिता सती चैतन्यगतमज्ञानं निवर्तयति । तस्याः चैतन्यावर काऽज्ञाननिवृत्तिरेव प्रयोजनम् । अज्ञाननिवृत्त्यनन्तरमेव 'अहं नित्यशुद्धबुद्धस्वरूपं 'ब्रह्म' इत्यनुभवस्तस्य भवति । ननु अधिकारिणः शिष्यस्य तत्त्वमस्यादिवाक्यश्रवणेन उत्पन्नया अखण्डचैतन्यवृत्त्या प्रत्यक्चैतन्याश्रिताऽज्ञाने निवारितेऽपि अज्ञानकार्यस्य सकलचराऽचरप्रपञ्चस्य पूर्ववदेव प्रत्यक्षतया भासमानत्वात् कथमेकमेवाऽद्वितीयमिति अद्वैतसिद्धिः ? इत्यत आह- तदेति । कारणे विनष्टे कार्यमपि नश्यति इति पटकारणानां तन्तूनां दाहे पटात्मकस्थ कार्यस्यापि दाहो यथा भवति, तथैव अखिलप्रपञ्चकारणभूताऽज्ञाननाशे तत्कार्यस्य

अखिलप्रपञ्चस्यापि विनाशो भवति । अर्थात् कारणाऽज्ञाननाशे तत्कार्यसमस्तप्रपञ्चनाशादद्वैतसिद्धिरिति यावत् ।

प्रपञ्चयोरुभयोरपि विनाशात् अद्वैतसिद्धिः।

ननु कारणभूतस्य अज्ञानस्य नाशेन तत्कार्यभूतस्य प्रपञ्चस्य नाशोऽस्तु तथापि अखण्डाकाराकारितवृत्तेः निवृत्त्यभावात् (सद्भावात्-अनष्टत्वात्) कथमद्वैतसिद्धिः ? इत्याशङ्क्याह - तदन्तर्भूतेति । अखण्डाकाराकारितवृत्तेरपि अज्ञानतत्कार्यभूतप्रपञ्चान्तः पातितया कारणभूताऽज्ञान निवृत्या तत्कार्यस्वरूपवृत्तिप्रपञ्चयोरुभयोरपि विनाशादद्वैतसिद्धिः ।

ननु एवमज्ञानप्रपञ्चचित्तवृत्तीनां विनाशेऽपि वृत्तौ प्रतिबिम्बितस्य चैतन्याभासस्य वर्तमानत्वात् न अद्वैतसिद्धिः स्यादिति आह-तत्रेति । दर्पणे प्रतिबिम्बितं मुखं, दर्पणाभावे यथा पृथक्भाव भासते तथा चित्तवृत्तौ प्रतिबिम्बितं चैतन्यं, चित्तवृत्त्यभावे पृथक् प्रतीतं न भवति । इत्थञ्च प्रदीपप्रभा यथा रविप्रभां भासयितुम् असमर्था सती, रविप्रभया अभिभूयते, तथैव प्रतिबिम्बितचैतन्यमपि वृत्तिनाशानन्तरं पृथक् न प्रतीयते, अपितु स्वयं प्रकाशमानस्य प्रत्यगभिन्नपरब्रह्मणः अवभासनाऽसमर्थत्वात् तेन अभिभूतं सत् स्वोपाधिभूतचित्तवृत्तिविनाशात् दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नमात्रमवतिष्ठते ।। ३२ ।

## Summarised Overview

अस्मिन् एकके तत्त्वमसि इति महावाक्यस्य विचारः विस्तृतरूपेण कृतः। इदं तत्त्वमसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणंभावश्चेति । अनन्तरं जहल्लक्षणा, अजहल्लक्षणा,जहदजहल्लक्षणा च प्रतिपाद्य जहदजहल्लक्षणाया तत्त्वमसि इति महावाक्यं समर्थयति। एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावापरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति ।

## Assignments

1.तत्त्वमसि महावाक्यस्थ-तत् त्वं पदयोः शोधनाप्रकारं निरूपयत।
2.सामानाधिकरण्यं प्रतिपादयत।
3.विशेषणविशेष्यतां विशदयत।
4.लक्ष्यलक्षणसम्बन्धं निरूपयत।
5.टिप्पणीं लिखत- जहल्लक्षणा, अजहल्लक्षणा,जहदजहल्लक्षणा ।
6.अहं ब्रह्मास्मि इति अनुभववाक्यं विशदयत।

## Suggested Readings

1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

## References

*1.Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# षड्विधतात्पर्यनिर्णायकलिङ्गानि

## Learning Outcomes

- वेदान्ततत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण षड्विधतात्पर्यनिर्णायकलिङ्गानां अवबोधः जायते।

## Background

पुत्रादीनां आत्मत्वं श्रुतिवाक्यैः निरस्य आत्मा सच्चिदानन्दम् इति उक्तम्। तत्त्वमसि इति महावाक्यस्य विचारः जहल्लक्षणया, अजहल्लक्षणया,जहदजहल्लक्षणया च प्रतिपाद्य अनन्तरं जहदजहल्लक्षणया तत्त्वमसि इति महावाक्यं समर्थयति। अस्मिन् एकके ब्रह्मसाक्षात्कारोपयोगिनां श्रवणादीनां निरूपणम् करोति।

## Keywords

षड्विधतात्पर्यनिर्णयलिङ्गानि, श्रवणम्, मननम्, निदिध्यासनम्, समाधिः, उपक्रमोपसंहारौ, अभ्यासः, अपूर्वः, फलम्, अर्थवादः, उपपत्तिः,



SGOU

## Discussion

### 2.3.1.साक्षात्कारोपयोगिनां श्रवणादीनां निरूपणम्

साक्षात्कारोपयोगिनां श्रवणादीनां निरूपणम्

एवम्भूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते । श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम् । लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि । तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः "एकमेवाद्वितीयं" इत्यादौ "ऐतदात्म्यमिदं सर्वं" इत्यन्ते च प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ।प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र "आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्रैव "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यद्वितीयवस्तुप्रशंसनम् । प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते। मननं तु श्रुतस्य। द्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्। विजातीयदेहादिप्रत्ययरहिता द्वितीयवस्तु सजातीयप्रत्ययप्रवाहो निदिध्यासनम् ।

समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीय

वस्तुनि तदाकाराकारिता याश्चित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते ।

तदुक्तम्-

"दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् ।

आलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्" इति ।।

(उपदेशसाहस्रि-दृशिस्वरूपपरमार्थदर्शनप्रकरणम्-1)

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयस्त्वाकारा कारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते । ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ ३४ ॥

श्रवणमननादीनि साधनानि अनुष्ठेयानि।

व्याख्या-एवंविध साक्षात्कारात्मकानुभवपर्यन्तमनुष्ठेयं श्रवणादिसाधनसमूहं प्रदर्शयितुमारभते - एवंभूतेति । श्रुत्या, युक्त्या, अनुभवेन च समस्तोपाधिरहितस्य प्रत्यगभिन्नपरमानन्दचिद्रूपस्य ब्रह्मणः साक्षात्कारपर्यन्तं श्रवणमननादीनि साधनानि अनुष्ठेयानि । अतः तेऽपि श्रवणादयः प्रदर्श्यन्ते । श्रवणस्य लक्षणमाह षड्विधेति ।

श्रवणम् - लीनमर्थ गमयति' इति व्युत्पत्त्या ब्रह्माऽत्मनोः एकत्व-

निश्चायकैः उपक्रमोपसंहारादिभिः षड्विधैर्लिङ्गैः सर्वेषां वेदान्तवाक्यानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणं श्रवणमित्यर्थः। तानि लिङ्गानि क्रमेण विभजते -

उपक्रमेति । तथा चोक्तम् -

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ।।" इति ।।

(१) उपक्रमोपसंहारौ तावत् दर्शयति - तत्र प्रकरणप्रतिपाद्यस्येति । प्रकरणप्रतिपाद्यं विषयम् आदौ उपक्रम्य (प्रारभ्य) अन्ते तस्यैव उपपादनम् - उपक्रमोपसंहारौ इत्यर्थः । तत्र छान्दोग्यश्रुतिमुदारति - यथेति । यथा छान्दोग्ये षष्ठाध्याये

प्रकरण-प्रतिपाद्यमद्वितीयं वस्तु 'एकमेवाऽद्वितीयथम्' - ( छा० ६।८।७) इति आदौ उपक्रम्य, ऐतदात्म्यमिदं सर्वम् (छां० ६।००७) इत्येवंरूपेण अन्ते तस्यैव उपपादनम्।

प्रकरणप्रतिपाद्यस्य अर्थस्य प्रकरणस्य मध्ये असकृत् प्रतिपादनम् अभ्यासः ।

(२) अभ्यासः - अभ्यासस्य लक्षणमाह- पौनःपुन्येनेति। प्रकरण-प्रतिपाद्यस्य अर्थस्य प्रकरणस्य मध्ये असकृत् प्रतिपादनम् अभ्यास इत्यर्थः । तत्र श्रुतिमुदाहरति-यथेति । छान्दोग्ये षष्ठाध्याये अद्वितीयवस्तुनः तत्प्रकरणमध्ये 'तत्त्वमसि' इत्येवंरूपेण नवकृत्वः प्रतिपादनम्।

(३) अपूर्वता - अपूर्वताया लक्षणमाह- प्रमाणान्तरेति। प्रकरण-प्रतिपाद्यस्य अद्वितीयवस्तुनः प्रमाणान्तराऽविषयत्वम् अपूर्वता, इत्यर्थः। तत्र छान्दोग्यश्रुतिमुदाहरति - "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिभिः ब्रह्मणः उपनिषन्मात्रवेद्यत्वप्रतिपादनात् ब्रह्मणः अपूर्वता इत्यर्थः । अथवा ब्रह्मणः स्वप्रकाशत्वेन अतिरिक्तप्रमाणानपेक्षत्वाद् ब्रह्मणः अपूर्वता विज्ञेया।

(४) फलम् - प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य (ब्रह्मज्ञानस्य) तदनुष्ठानस्य वा श्रूयमाणं यत् प्रयोजनं तत् फलम् इत्यर्थः। तत्र श्रुतिमुदाहरति- यथेति । छान्दोग्ये षष्ठाध्याये "आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" - ( छा० ६।१४।२) आचार्यवान् पुरुष एव आत्मानं वेत्ति । तस्य तावानेव विलम्बः यावत् स अस्मात् शरीरात् पृथक् न भवति। ततः पश्चात् स ब्रह्मैव ब्रह्मरूप एव भवति । इत्थम् अद्वितीयवस्तुज्ञानस्य प्रयोजनं तद्भावापत्तिरेवेत्यर्थः।

(६) उपपत्तिः - उपपत्तिं लक्षयति - प्रकरणप्रतिपाद्येति । प्रतिपाद्यविषयं प्रमाणयितुं या युक्तिः उपस्थाप्यते सा उपपत्तिः। तत्र श्रुतिमुदाहरति - यथा सौम्येति। छान्दोग्ये षष्ठाध्याये "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्" - (छां० ६।१।४)। जगतो ब्रह्मविवर्तत्वसाधनाय इयं श्रुतिरुपपत्तिः । यथा एकेनैव मृत्पिण्डेन निर्मितं घटशरावादि वस्तु- विकारानुरूपनाममात्रेण

भिन्नमपि वस्तुतः मृत्तिकारूपमेवेति सत्यम् । एवमेव इदं सम्पूर्ण नामरूपात्मकं जगत् ब्रह्मणो विवर्तरूपं, नान्यत् इति ब्रह्मविवर्तस्य जगतः गिरि-नदी समुद्रात्मकविकार- नामधेययोः वाचारम्भणमात्रत्वात् चिन्मात्रमेव अवशिष्यते, रज्जुविवर्तस्य सर्पस्य रज्जुमात्रावशेषवत्, अतः तदेव सत्यमिति युक्तिः (उपपत्तिरित्यर्थः) ।

(५) अर्थवादः - पञ्चमलिङ्गस्य अर्थवादस्य लक्षणमाह- प्रकरणेति । 'प्रकरणप्रतिपाद्यस्य वस्तुनः स्थाने स्थाने प्रशंसनम् अर्थवादः । तत्र श्रुतिमुदाहरति- यथेति । छान्दोग्ये षष्ठाध्याये 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् ।' इत्यादौ अद्वितीयवस्तुब्रह्मणः प्रशंसा ।

मननम् - श्रवणनिरूपणानन्तरं तदुत्तराङ्गस्य मननस्य लक्षणमाह- मननं त्विति । षड्विधलिङ्गतात्पर्यज्ञानपूर्वकं वेदान्ताऽविरोधिनीभिः युक्तिभिः पूर्वश्रुतस्य अद्वितीयब्रह्मणः निरन्तरमनुचिन्तनं मननमित्यर्थः ।

निदिध्यासनम् - निदिध्यासनलक्षणमाह - विजातीयेति । विजातीयदेहादिबुद्धधन्तजडपदार्थेषु तद्भिन्नता (ब्रह्मभिन्नता) निराकरणपूर्वकं सर्वत्राऽद्वितीयब्रह्मैक्यप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः ।

## Summarised Overview

अस्मिन् एकके ब्रह्मसाक्षात्कारोपयोगिनां श्रवणादीनां निरूपणम् कृतम्। एवम्भूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्यनुष्ठान स्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते । श्रवणं नाम षड्विधलिङ्गरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम् । लिङ्गानि उपक्रमादीनि । तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुप-तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपादनम्। षड्विधलिङ्गतात्पर्यज्ञानपूर्वकं वेदान्ताऽविरोधिनीभिः युक्तिभिः पूर्वश्रुतस्य अद्वितीयब्रह्मणः निरन्तरमनुचिन्तनं मननमित्यर्थः ।विजातीयदेहादिबुद्धधन्तजडपदार्थेषु तद्भिन्नता (ब्रह्मभिन्नता) निराकरणपूर्वकं सर्वत्राऽद्वितीयब्रह्मैक्यप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः ।

## Assignments

1.कानि षट् लिङ्गानि ? कथञ्च तानि वेदान्तानां अद्वयब्रह्मपरत्वं प्रत्यायन्ति ?
2.श्रवणं निरूपयत।
3.मोक्षोपायसाधनानि कानि इति विशदयत।
4.अपूर्वता नाम का ?
5.अर्थवादं निरूपयत।

## Suggested Readings

1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

## References


1. *Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# समाधिः जीवन्मुक्तः च

## Learning Outcomes

- वेदान्ततत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अद्वैतसिद्धान्तानां ज्ञानं लभते।
- वेदान्तसारानुसारेण समाधेः जीवन्मुक्तस्य च स्वरूपं जानाति।

## Background

श्रुत्या युक्त्या,अनुभवेन च समस्तोपाधिरहितस्य प्रत्यगभिन्नपरमानन्दचिद्रूपस्य ब्रह्मणः साक्षात्कारपर्यन्तं मोक्षेच्छुः श्रवणमननादीनि साधनानि अनुष्ठेयानि इति पूर्वेऽस्मिन् एकके कथितानि। तत्र श्रवणादीनां स्वरूपं विस्तरेण प्रतिपादितम्। अस्मिन् एकके अद्वैतवेदान्तस्य प्रधानतत्त्वरूपेण वर्तमानौ समाधिजीवन्मुक्तौ प्रतिपादयति। समाधिः नाम का , समाधेः भेदः, जीवन्मुक्तस्य स्वरूपं च अस्मिन् एकके पठामः।

## Keywords

सविकल्पकसमाधिः, निर्विकल्पकसमाधिः, यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः, समाधिसाधनानि, विघ्नचतुष्टयम्, जीवन्मुक्तः, विदेहमुक्तः, आत्मस्वरूपः।

# Discussion

2.4.1.समाधिः

समाधिः द्विविधः सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीय-वस्तुनि तदाकाराकारिता याश्चित्तवृत्तेरवस्थानम् । तदा मृण्मय-गजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते ।

तदुक्तम्-

"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं
तदेव चाहं सततं विमुक्त ओम्" इति ।।

सविकल्पकसमाधिः निर्विकल्पकसमाधिः च।

निविकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवद-द्वितीयवस्त्वाकारकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रम -वभासते । ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ ३४ ॥

समाधिः - व्युत्थानसंस्कारस्य अभिभवे निरोधसंस्कारस्य च प्रादुर्भावे सति ध्येयरूपे चित्तस्य निश्चलतया अवस्थानम् अर्थात् चित्तस्य एकाग्रतापरिणामः समाधिरित्यर्थः । स च समाधिः द्विविधः (१) सविकल्पकः (२) निविकल्पकश्च । तत्र सविकल्पकस्य लक्षणमाह- **तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकारा-कारिता याश्चित्तवृत्तेरवस्थानम्** । तत्र तयोः

सविकल्पकः द्विविधः

सविकल्पकनिविकल्पकयोर्मध्ये सविकल्पकोऽपि द्विविधः । 'अहं ब्रह्मास्मी' ति शब्दानुविद्धतया अद्वितीये वस्तुनि चित्तवृत्तेः स्थितिरित्येकः । द्वितीयस्तु ज्ञातृ-ज्ञान-ज्ञेयेति त्रिपुटीभेदभानपूर्वकम् अहं ब्रह्मास्मीति तदाकाराकारितायाः

चित्तवृत्तेः अद्वितीयवस्तुनि अवस्थानम् । ननु समस्तभेदनिरसनपुरःसरमद्वैतवस्तुमात्र- भानार्थमेव उक्तसमाध्योः प्रवर्तनम्, किन्तु समाध्यस्थायामपि ज्ञात्रादिभेदभाने अद्वैतवस्तुसिद्ध्यभावः, तदा समाधेः क उपयोगः ? इति भक्षितेऽपि लशुने न शान्तो व्याधिः इत्याशङ्का भवति । तदा सविकल्पकसमाध्यनुभवकाले ज्ञात्रादिभेदभानस्य वाचारम्भणमात्रत्वात् अद्वैतमेव वस्तु भासते, यथा मृण्मयगजादिभानेऽपि मृद्भानं भवति, तद्वत् ।

### 2.4.1.1.निर्विकल्पकसमाधिः

**निविकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम् ।** अयं च द्विविधः-- चिरकालाभ्यस्तश्रवणाद्युत्तरस विकल्पकसमाधेः अनुभवजनितसंस्कारसहकृतायाः चित्तवृत्तेः ज्ञात्रादित्रिपुटीलयपूर्वकम् अद्वैते वस्तुनि एकभावनारूपः प्रथमः। एतन्निविकल्पकसमाधेः अभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकम् अखण्डाकाराकारिताया चित्तवृत्तेः, विनापि स्वस्फूर्ति केवलचिदानन्दात्मना अवस्थानात्मको द्वितीयः ।अत्र ज्ञातृ-ज्ञान-ज्ञेयभेदभावभानस्य अभाव इति अद्वितीयवस्तुनि तदाकाराकारिवचित्तवृत्तेः अत्यन्तमेकीभावेन अवस्थानम् । अर्थात् दीर्घतराभ्यासवशात् अस्मिन् समाधौ संस्कारा नश्यन्तीति ज्ञातृ- ज्ञान-ज्ञेयभेदभावलोपेन अस्मिन् समाधौ अद्वितीयवस्त्वाकाराकारितचित्तवृत्तिरपि न पृथक् अवभासते, अपितु अद्वितीयवस्तुमात्रमेव अवभासते । यथा जलाकाराकारितलवणस्य न पृथगवभासः अपितु जलमात्रस्यैव अवभासः तद्वदवगन्तव्यः ।

निर्विकल्पकः द्विविधः।

ननु समाधिसुषुप्त्योः विज्ञेयाभावेन वृत्त्यभानात् अभेदमाशंक्य परिहरति- ततश्चेति । तत्र युक्तिमाह - उभयत्रेति । समाधिसुषुप्त्योः उभयत्र वृत्त्यभाने समानेऽपि समाधौ जलाकाराकारितलवणमिव अद्वितीयवस्तुनि अतितरामेकी-भावेन अनवभासमानायाः वृत्तेः सद्भावात्, सुषुप्तौ च वृत्तेः सर्वथैव अभावात् समाधिसुषुप्त्योः भेदोपपत्तेः ।

### 2.4.2.समाधिसाधनानि

समाधिसाधनानि

**अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाधयः । तत्र "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"। "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" । करचरणादिसंस्थान विशेषलक्षणानि पद्मस्वस्तिका-दीन्यासनानि । रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामः । इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । तत्राद्वितीय वस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् । समाधि-स्तूक्तः सविकल्पक एव ॥ ३५ ॥**

उक्तसमाधेः साधनापेक्षायां साधनानि प्रतिपादयन्ति। यमनियमासनप्राणायामप्रत्याहारधारणा- ध्यानसमाधयः । इमानि यमाद्यष्टाङ्गानि, तत्रान्तिमानि त्रीणि समाधेरन्तरङ्गसाधनानि सन्ति । । साधक निषिद्धेभ्यः कर्मभ्यो यमयन्ति नियमन्ति इति यमाः । तेषु यमाद्यष्टांगेषु मध्ये अहिंसादयः पञ्च यमाः अवश्यमनुष्ठेयाः । तत्र अहिंसा - वाङ्मनः कायैः प्राणिपीडापरिहारोऽहिंसा । सत्यम्- यथार्थभाषणम् । अस्तेयम्-अदत्तस्य परवस्तुनः अनादानम् । ब्रह्मचर्यम् - अष्टविधमैथुनवर्जनम्, तथा चोक्तम् - "स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च । एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥"- (दक्षसं० अ० ७) अपरिग्रहः- सांसारिकवस्तुनः असंग्रहः । नियमान् आह-शौचेति । जन्महेतुभूतान् काम्यधर्मान् निवर्त्य मोक्षसाधके निष्कामधर्मे नियमयन्ति प्रेरयन्ति इति शौचादयो नियमाः । ते शौचादयः पञ्च नियमा अवश्यमनुष्ठेयाः । शौचम् - शौचं तु द्विविधं बाह्यमाभ्यन्तरञ्च, तत्र मृज्जलाभ्यां बाह्यम्, आन्तरं भावशुद्धिरूपम् । तदुक्तम् - "शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ।।' ( याज्ञव० गी० १।६९ ) । सन्तोषः - भगवदिच्छया प्राप्ते सन्तुष्टिः अलाभे च अविषादः । तपः - कामानशनम् । स्वाध्यायः - प्रणवज्जपः उपनिषद्यन्यावृत्तिश्च ।

ईश्वर-प्रणिधानम् - ईश्वरस्य मानसैरुपचारैरभ्यर्चनम् । आसनं लक्षयति। आस्यते स्थीयते अनेन प्रकारेण इत्यासनम्, स्थिति-विशेषः । पद्मासनस्वस्तिकासनादीनि कार्याणि । प्राणायामलक्षणमाह - रेचकेति । रेचकः - प्राणवायोः शनैः शनैर्वामनासापुटात् दक्षिणनासापुटाद् वा सव्यापसव्यन्यायेन बहिर्निःसारणम्, पूरकः- तस्य तथैवान्तः प्रवेशनम्, कुम्भकस्तु - पूरितस्य वायोरन्तरेव निरोधः इतिभेदः । प्रत्याहारः-श्रोत्रादी-नामिन्द्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात् पाषाणोपरि प्रयुक्तशरसंघात इव प्रत्यावर्तनम् । धारणा अद्वितीये वस्तुनि चित्तनिक्षेपणम्, धारणाभ्यासाभावेन चित्तस्थैर्याभावात् । ध्यानम्-अद्वितीये वस्तुनि विच्छिद्य विच्छिद्य चित्तवृत्ति-प्रवाहीकरणम् । समाधिः - अद्वितीये वस्तुनि निरन्तरं चित्तवृत्तिप्रवाहीकरणम्, अयं समाधिः सविकल्पक एवं बोद्धव्यः । समाधेर्ध्यानस्य च भेदं द्योतयितुं विच्छिद्य विच्छिद्येत्युक्तम् ।

सन्तोषः- भगवदिच्छया प्राप्ते सन्तुष्टिः अलाभे च अविषादः।

### 2.4.3.समाधेः विघ्नचतुष्टयम्

**एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसा-स्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावदखण्ड-वस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्ते-र्रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः । अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्प-कानन्दास्वादनं रसास्वादः । समाध्यारम्भसमये सविकल्पका-नन्दास्वादनं वा ॥ ३६ ॥**

लयविक्षेपकषायरसास्वादश्चत्वारो विघ्नाः।

**व्याख्या-** उक्तयमाद्यष्टाङ्गसहितं निर्विकल्पकसमाधिमनुतिष्ठतः साधकस्य यदा अतिवृष्टयनावृष्टिराष्ट्रविप्लव-व्याघ्र-चोर-ज्वराद्युपद्रवविघ्ना अपि सम्भवन्ति, तदा तन्निवृत्तिः लोकावगतसाधनावलम्बनेन कर्तव्या । किन्तु यदा मनसि एव विघ्नाः प्रादुर्भविष्यन्ति, तदा तन्निवारणोपायमुपदेष्टुकामः तत्रत्यानु विघ्नान् निर्दिशति। तत्र चत्वारो विघ्नाः सम्भवन्ति । तत्रायं विघ्नं लक्षयति-लय इति । तत्र लयो द्विविधः-तत्र दीर्घकालं

यावत् अष्टाङ्गसहितस्य निर्विकल्पकसमाधेः दृढाभ्यासेन प्रतप्तलोहतले निक्षिप्ततोयबिन्दुवत्, स्नेहरहित दीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे ब्रह्मणि चित्तवृत्तेर्लयः प्रथमः। द्वितीयवस्तु - मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेः बाह्यविषयग्रहणानादरे सति प्रत्यगात्मस्वरूपस्य अनवभासनात् वृत्तेः स्तब्धीभावलक्षणनिद्रारूपः । तत्र प्रथममङ्गीकृत्य द्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह- अखण्डेति । द्वितीयं विघ्नमाह-अखण्डेति । अखण्डवस्तुग्रहणार्थम् अन्तर्मुखतया प्रवृत्तायाः चित्तवृत्तेः अखण्डवस्त्वनवलम्बनेन पुनर्बाह्यविषयग्रहणाय प्रवृत्तिः विक्षेपः । रागादयस्त्रिविधाः- बाह्या, आभ्यन्तरा, वासनामात्ररूपाश्च । बाह्याः पुत्रादिविषयाः । आभ्यन्तरा मनोराज्यादयः । संस्काररूपा वासनामयाः । तत्र अनेकजन्मसु आभ्यस्तबाह्याभ्यन्तर रागादीनामनुभवोत्पन्नसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेन अन्तर्मुखमपि चैतन्य ग्रहणे शक्त्यभावात् मध्ये एव स्तब्ध भवति । यथा राजदर्शनाय स्वगृहान्निर्गत्य राजमन्दिरे प्रविष्टस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः, तथा परित्यक्त-बाह्य विषयस्य अखण्डवस्तुग्रहणाय प्रवृत्तस्य उद्बुद्धरागादिसंस्कारैः स्तब्धीभावात् अखण्डवस्तुनः अग्रहणं कषायः । चतुर्थ विघ्नमाह- अखण्डेति । द्विविधयोः सविकल्पक समाध्योर्मध्ये द्वितीयः शब्दाऽननुविद्धः त्रिपुटीविशिष्टः, तस्मिन् यः आनन्दः बाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तः, न तु चैतन्यप्रयुक्तः तमेवानुभवन् वानन्दो भवति । यथा निधिग्रहणाय प्रवृत्तस्य निधिरक्षकभूतप्रेतादिभिः आवृतस्य निधिप्राप्त्यभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महान् आनन्दो भवति, तथा सविकल्पकसमाधौ अखण्डवस्तुनः अनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्ति-जनितमानन्द सविकल्पकरूपं ब्रह्मा- नन्दभ्रमेण आस्वादयति, तदेव रसास्वादनम् । लक्षणान्तरमाह-समाध्यारम्भेति । निर्विकल्पकसमाधेः प्रारम्भकाले अनुभूयमानं सविकल्पकानन्दं त्यक्तुमसमर्थतया पुनस्तस्यैव आस्वादनं रसास्वादः ।

चित्तं निर्वातदीपवदचलसदखण्डचैतन्यमात्रमवतिष्ठते

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलसदखण्डचैतन्यमात्रमवतिष्ठते यदा, तदा निर्विकल्पकः समाधिरित्युच्यते। तदुक्तम् -

"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः।

सकषायं विजानीयाच्छमप्राप्तं न चालयेत्॥

न स्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति।

"यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता" इति च॥३७॥

व्याख्या -उपर्युक्तैश्चतुर्भिर्विघ्नैः रहितं चित्तं वायुरहितस्थानस्थित दीपक इव निश्चलं सत् अखण्डचैतन्यमात्रमवतिष्ठते, सैव निश्चलावस्थितिः चित्तस्य निर्विकल्पकसमाध्यवस्था निगद्यते। अर्थात् लयादिविघ्नचतुष्टयाभावेन चित्तस्य ज्ञेये वस्तुनि यत् नैश्चल्यं तदेव निर्विकल्पकसमाधिस्वरूपम्। लयादिविघ्नसद्भावे तन्निवृत्तिप्रकारे च गौडपादसम्मतिमाह - तदुक्त मिति।

"लये सम्बोधयेच्चितं विक्षिप्तं शमयेत् पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्॥ नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति।

"यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता" इति च॥ ३३॥

अखण्डैकरसे चिन्मात्रे अवस्थितिः निर्विकल्पकसमाधिः

पूर्वोक्तनिद्रालक्षणे लये प्राप्ते तन्निवृत्त्यर्थं चित्तगतजाड्यापनोदनपूर्वकं तदुत्साहयेत्। विक्षेपरूपविघ्ने समुपस्थिते च चित्तस्य बाह्यप्रवणतां विषय- वैराग्यादिना निगृह्य अन्तःप्रवणञ्च तत् कृत्वा वैर्यावलम्बनेन पुनः अद्वितीय-वस्तुनिष्ठं कुर्यात्। कषायरूपविघ्ने उपस्थिते विजानीयात्-- कलुषितं मे चित्तम्, इयं रागादिवासना बाह्यविषयप्रापिका, अतस्तया न अखण्डवस्तुनः प्राप्तिर्भविष्यतीत्यवधार्य चित्तमन्तर्मुखं ( प्रत्यक् प्रवणं) कुर्यात्। एवं कृते सति यदा चित्तं शमं प्राप्नुयात् तदा तच्चित्तं तस्मात् न विचालयेत्। अपितु तत्रैव स्थिरीकुर्यात्। रसास्वादलक्षणे विघ्ने समुपस्थिते तं विषयप्रपञ्चभारत्यागजन्यं सविकल्पकरसं नानुभवेत्। तदानन्दमात्रेण आत्मानं कृतार्थं न मन्वीत, किन्तु प्रज्ञया



SGOU

विवेकबुद्ध्या निःसंगः अर्थात् प्रापश्चिकसुखदुःखादिविरहितः सन् सविकल्पकानन्दे अनासक्तो ( स्थितप्रज्ञो) भवेत् । तदुक्तं भगवता -

"प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।"

- ( गी० २।५५ )

अनेन प्रकारेण लयादिविघ्नचतुष्टयरहितस्य चित्तस्य अखण्डैकरसे चिन्मात्रे अवस्थितिः निर्विकल्पकसमाधिरिति ज्ञेयम् । एतदेव भगवद्वाक्योदाहरणेन प्रदर्शयति - यथा दीप इति । निवातस्थः अन्तर्गृहस्थो दीपो यथा निर्गते न चलति तथा ब्रह्मणि स्थापितं ब्रह्मविच्चित्तं न चलति, ब्रह्मण्येव ब्रह्मात्मना निश्चलीभूय तिष्ठति, अयमेव असम्प्रज्ञातः समाधिः ।

### 2.4.4.जीवन्मुक्तलक्षणम्

अखिलबाधरहितो ब्रह्मनिष्ठः।

**अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्ड ब्रह्मणि साक्षात्कृतेऽज्ञानतत्तत्कार्य सञ्चितकर्मसंशय विपर्ययादीनामपि बाधितत्वादखिलबाधरहितो ब्रह्मनिष्ठः ।**

**“भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।**

**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" ॥ इत्यादिश्रुतेः ॥ ३८ ॥**

**व्याख्या** - एतत् समाधिद्वयं जीवन्मुक्तस्यैव सम्भवति, नान्यस्येति हृदि कृत्वा आदो जीवन्मुक्तस्वरूपं निरूपयिति। अथ साघननिरूपणानन्तरम् । जीवन्मुक्तस्य लक्षणमाह-जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यन्तेन । गुरूपदेशेन, श्रुतिवाक्येन, स्वानुभवेन च जीव-ब्रह्मैक्यस्य ज्ञानं भवति, तादृशेन ज्ञानेन आत्मगताऽखिलाऽज्ञानं नश्यति, तदा अखण्डब्रह्मणः साक्षात्कारो जायते । तस्थामवस्थायां मूलभूतमज्ञानम्, तत्कार्यभूतानि सञ्चितकर्माणि संशय-विपर्ययादयश्चापि नश्यन्ति, इति

अखण्डैकरसे चिन्मात्रे अवस्थितिः निर्विकल्पकसमाधिः

परित्यक्ताऽखिलबन्धनस्य आत्मनो ब्रह्ममात्रे स्थितिर्भवति, एवं भूतो ब्रह्मनिष्ठ एव जीवन्मुक्त इत्युच्यते। जीवतः पुरुषस्य कर्तृत्व-भोक्तृत्व-सुख-दुःखादिधर्माः क्लेशदायकत्वेन बन्धन- स्वरूपा एवेति तेषु विनष्टेषु विमुक्तसमस्तबन्धनस्य तस्य ब्रह्ममात्रे निष्ठा अवतिष्ठते, अत एवंभूतस्य ब्रह्मनिष्ठस्य जीवन्मुक्त इति संज्ञा समुचितैव । तत्त्वसाक्षात्कारानन्तरं मुक्त एव भवतीत्यत्र प्रमाणमाह -

"भिद्यते हृदयग्रन्थिरिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।।

- ( मुण्ड० उ० २।२।८) इति

अनया श्रुत्या ब्रह्मसाक्षात्कारदशा निरूपिता- आत्मतत्त्वे साक्षात्कृते सति हृदयग्रन्थिः अहंकारः चिज्जडात्मकत्वात् ग्रन्थिरिव ग्रन्थिः । बुद्धिस्थिताऽविद्या वासनामयकामनादि विनश्यति, सर्वसंशयाः ज्ञेयपदार्थविषयकसमस्ताः सन्देहाः विनश्यन्ति, अखिल-संशयनिवृत्तौ अस्य आत्मनः सर्वकर्माणि, ज्ञानोत्पत्तिपूर्वजन्मान्तरकृतान्यपि अद्यावधि अफलोन्मुखानि तथा ज्ञानोत्पत्या सह कृतानि कर्माणि सर्वाणि नश्यन्ति। तस्मिन् असंसारिणि परावरे सर्वात्मके, अत्र सर्वात्मकत्ववचनं तद्व्यतिरिक्तस्य अभावपरम् । अथवा कारणरूपेण परे कार्यरूपेण च अवरे एव परावरे 'अयं साक्षात् अहमेव' इत्थं साक्षात्कृते सति जीवन अपि पुरुषः मुक्तो जायते । जीवन्मुक्तिपक्षे अस्यात्मनः कर्माणि प्रारब्धातिरिक्तानि सञ्चितानि क्रियमाणानि च क्षीयन्ते। परममुक्तिपक्षे प्रारब्धसहितान्यपि क्षीयन्ते ।

### 2.4.5.जीवन्मुक्तस्य कर्मफलबन्धो न

**अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेणाशनापिपासा - शोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रिय-माणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति । यथेन्द्रजालमिति**

**ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। "स चक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतेः।**

**उक्तं च---**

जीवन्मुक्तस्य कर्मबन्धो नास्ति इति निरूपणम्

**सुषुप्तवज्जाग्रति यो न पश्यति**

**द्वयं च पश्यन्नपि चाद्वयत्वतः।**

**तथा च कुर्वन्नपि निष्क्रियश्च यः**

**स आत्मविन्नान्य इतीह निश्चयः॥ इति॥ ३९॥**

**व्याख्या** - ननु जीवन्मुक्तः स्वीयशरीरेन्द्रियादिभिर्व्यवहारं करोति न वा ? व्यवहरति चेत् बद्ध-मुक्तयोः को भेदः ? न व्यवहरति चेत् शरीरेन्द्रियादीनामनुपयोगात् सद्योविनाशप्रसङ्गः इति सन्देहनिरासार्थमाह - अयं त्विति। अयं जीवन्मुक्तः जाग्रदवस्थायां मांस-रुधिर-मल-मूत्रादीनां पात्रेण अनेन शरीरेण, अन्धत्व-बधिरत्वादिभाजनेन बाह्ये न्द्रियसमूहेन, क्षुत्-पिपासा-शोक-मोहादि- पात्रेण अन्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि प्रारब्धकर्मणा-मुपभुज्यमानानि फलानि च साक्षितया कर्तृत्व-भोक्तृत्वाभिमानहीनः अन्यदृष्ट्या पश्यन्निव भासमानोऽपि वस्तुतः स्वदृष्ट्या न पश्यति, यतो तत्त्वज्ञानेन कर्तृ-त्वाद्यभिमानमूलभूतस्य अज्ञानस्य विनष्टत्वात्। बद्धपुरुषापेक्षया जीवन्मुक्तस्यायमेव विशेषः। यथा इदमिन्द्रजालमिति ज्ञानवान् जनः तत् पश्यन्नपि परमार्थ-मेतदिति बुद्ध्वा न पश्यति। न व्यवहरतीतिद्वितीयपक्षे यथा बलवता पुरुषेण प्रेरितो बाणः पाषाणो वा वेगक्षयं यावत् न प्रतति, तथैव प्रवृत्तफलकर्माधीनस्य ( प्रारब्धकर्माधीनस्य ) शरीरस्य ( देहस्य) शीघ्रनाशः (सद्यः पातः ) न सम्भवति। जीवन्मुक्तो देहेन्द्रियादिभिः व्यवहरन्निव दृश्यमानोऽपि न परमार्थततो व्यवहरतीत्यत्र श्रुतिम्प्रमाणयति - स चक्षुरचक्षुरिवेति। चक्षुरादिमानपि प्रपञ्चरूपाद्यदर्शनात् चक्षुरादिहीन इव भवतीत्यर्थः।

आदिपदात् "तदेजति तन्नैजति" - (ईशा० उ० ५) इत्यादि श्रुत्यन्तर- परिग्रहः। उक्तेऽर्थे पूर्वाचार्यसम्मतिम्प्राह - उक्तं चेति।

"सुषुप्तवज्जाग्रति यो न पश्यति

द्वयं च पश्यन्नपि चाद्वयत्वतः।

तथा च कुर्वन्नपि निष्क्रियश्च यः

स आत्मविन्नान्य इतीह निश्चयः॥" इति।

(उपदे० सा० ८५।१०।१३)

जीवन्मुक्तः देहेन्द्रियादिभिः व्यवहरन्निव दृश्यमानोऽपि न परमार्थतः व्यवहरति।

यः कोऽपि महापुरुषः ब्रह्मात्मैक्यसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः सुषुप्तावस्थायां यथा द्वैतं न पश्यति, तथा सर्वत्र ब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि द्वैतं न पश्यति, तस्य दृष्ट्या ब्रह्मव्यतिरिक्तजडपदार्थाभावात् स तथोक्तः। कदाचित् व्युत्थानदशायां आविद्यकसंस्कारलेशवशात् भिक्षाटनादिव्यवहारेण द्वयं पश्यन् अपि समाध्यभ्याससामर्थ्यवशात् अद्वयत्वेन पश्यति स च तथोक्तः। यश्च लोकसंग्रहार्थं नित्यादिकर्माणि कुर्वन्नपि आत्मनि कर्तृत्वाभावनिश्चयेन निष्क्रियः कर्मरहितो भवति कर्मफलेन न लिप्यते, स जीवन्मुक्तो नात्रसंशयः कर्तव्यः। इह जगति स एव आत्मवित् नान्यः 'इति मे निश्चयः ।॥ उपदे० सा० ८५/१०/३।

### 2.4.6.जीवन्मुक्तस्य शुभकर्माचरणम्

**अस्य अज्ञानात्पूर्व विद्यमानानामेवाहारविहारादीनाम-नुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदा-सीन्यं वा। तदुक्तम्---**

**बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।**

**शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥ इति॥**

**ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः ।॥ इति ।।४०।।**

**व्याख्या-** ननु असौ जीवन्मुक्तः इति कथमन्यैर्ज्ञायते इति तदाह - अस्येति। अथवा जीवन्मुक्तस्य योगीश्वरस्य मम पुण्य-पापलेपो नास्तीत्यभिमानवशात् यथेष्टाचरणप्रसङ्गमाशङ्कय परिहरति-

अस्येति । अस्य जीवन्मुक्तस्य तत्त्वज्ञानात् प्रागेव शान्ति-सन्तोषादिशुभगुणैः अशुभकर्मवासना निवार्यते, अतो यथा संसारदशायां यदृच्छालब्धेषु अनुकूलेषु आहारादिषु प्रवृत्तिरासीत् तद्वदेव तत्त्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति न अशुभानाम् । एवञ्च शुभकर्म स्वत एव सम्पद्यते, तेन न यथेष्टाचरणप्रसंगः । ननु शुभवासनानुवृत्तेरपि प्रयोजनाभावात् किं तदनुवृत्त्या ? इत्यत आह-शुभाशुभयोरिति । शुभाऽशुभयोरुभयोः औदासीन्यं तस्य भवति, अन्यथा शास्त्रविहितं शुभमेव आचरतो न साधकाङ्क्षेदः स्यात् । औदासीन्यमुपेक्षा अर्थात् न तस्य विधिपरतंत्रप्रवृत्तिः न वा निषेधातिक्रमः । अशुभकर्मणि तस्य न कथमपि प्रवृत्तिरिति जीवन्मुक्तस्य न कथमपि यथेष्टाचरणप्रसंगः सम्भवति । ननु विधि- निषेधशास्त्रपरवशत्वं मुक्तस्य न चेत् तर्हि यथेष्टाचरणं प्राप्नोति इत्याशंकां नैष्कर्म्यसिद्धिवाक्येन प्रत्याचष्टे - तदुक्तमिति। "शुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि । शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ।।" ( नैष्क० सि०४।६२ ) इति । येन अद्वैततत्त्वं यथार्थतया समवगतं, तस्यापि यदि स्वेच्छाचरणं चेत् हि अपवित्रपदार्थभक्षणस्य कुक्कुरस्य जीवन्मुक्तमहापुरुषस्य चोभयोः को विशेषः स्यात् ? जीवन्मुक्तस्य ब्रह्मज्ञानित्वाभिमानो न भवतीत्यत्रापि सम्मतिमाह - ब्रह्मवित्त्वमिति । "ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतर ।" इति । - ( उपदे० सा० ११५-१२/१३) ब्रह्मविदहमिति गर्वं त्यक्त्वा आत्मनः अकर्तृत्वं यो जानाति स एव आत्मज्ञः, नाऽन्यः ।

जीवन्मुक्तस्य शुभकर्माचरणम्

( अमानित्वादिगुणानामलङ्कारत्वनिरूपणम् )

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टत्वादयः सद्गु-णाश्चालंकारबदनुवर्तन्ते । तदुक्तम्---

उत्पन्नात्मावबोधस्य ह्यद्वेष्टत्यादयो गुणाः । अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥ इति ।। ४१ ॥

अमानित्वादिगुणनाम लङ्कारत्वम्

व्याख्या - ननु अविद्याकार्यत्वात् यथेच्छाचरणस्य विद्यानिवृत्त्या तन्निवृत्तिवत् 'अमानित्वमदम्भित्वहिंसाक्षान्विरार्जवम्' ( गी० १३।७) तथा 'अद्वेष्टा सर्वभूतानाम्' - (गी० १२।१३), इति स्मृत्युक्तस्य अमानित्वाऽद्वेष्टृत्वादिगुणसमूहस्यापि अविद्याकार्यत्वाऽविशेषात् निवृत्तिरेव स्यात्, न तेषामनुवृत्तिरित्याशंक्य नियोगवशात् अनुवृत्त्यभावेऽपि निवृत्तिशास्त्रेण अविरुद्धस्वभावत्वात् तेषां न निवृत्तिरिति प्रदर्शयति--तदानीमिति । जीवन्मुक्तावस्थायाममानित्वाद्वेष्टृत्वादिसम्पादनस्य च विविदिषासन्न्यासविषयत्वात्, विदुषां तु लक्षणत्वेन अलङ्कारवत् स्वत एव तेषां गुणानामनुवृत्तिर्भवति । अत्र वातिककारवचनमुदाहरति-तदुक्तमिति ।

"उत्पन्नात्मायबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।

अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥" इति ।

( नैष्कर्म्यसि० ४।६९ )

अस्य विद्वत्सन्न्यासिनो जीवन्मुक्तस्य अद्वेष्टृत्वादयो गुणा अप्रयत्नेनैव स्वत एव भवन्ति, न तु साधनरूपिणः तं प्रति ते साधनरूपा भवन्ति । यतः उत्पन्नः आत्मावबोधः जीवब्रह्मैक्यनिश्चयरूपः, यस्य तस्य ते गुणाः लक्षणत्वेनैव परिचायकत्वेनैव तिष्ठन्ति ।

## Summarised Overview

अस्मिन् एकके प्रथमं निर्विकल्पकसमाधेः स्वरूपं विचारयति। अयं च द्विविधः-- चिरकालान्यस्तश्रवणाद्युत्तरसविकल्पकसमाधेः अनुभवजनि-संस्कारसहकृतायाः चित्तवृत्तेः ज्ञात्रादित्रिपुटीलयपूर्वकम् अद्वैते वस्तुनि एकभावनारूपः प्रथमः । एतन्निर्विकल्पकसमाधेः अभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकम् अखण्डाकाराकारितायाः चित्तवृत्तेः, विनापि स्वस्फूर्ति केवलचिदानन्दात्मना अवस्थानात्मको द्वितीयः । तत्र द्वितीयं पक्षमभिप्रेत्य बाह्यज्ञातृज्ञानादीति । अत्र ज्ञातृ-ज्ञान-ज्ञेयभेदभावभानस्य अभाव इति अद्वितीयवस्तुनि तदाकाराकारिवच्चित्तवृत्तेः अत्यन्तमेकीभावेन अवस्थानम् ।

अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्तत्कार्य सञ्चितकर्मसंशय विपर्ययादीनामपि बाधितत्वादखिलबाधरहितो ब्रह्मनिष्ठः ।

## Assignments

1.निर्विकल्पकसमाधिं विस्तरेण प्रतिपादयत।
2.सविकल्पकसमाधिं विस्तरेण प्रतिपादयत।
3.जीवन्मुक्तस्वरूपं निरूपयत।

## Suggested Readings


1. श्री सदानन्द प्रणीतः वेदान्तसारः - सारबोधिनी विमला संस्कृत - हिन्दी व्याख्योपेतः। डा. गजानन शास्त्री मुसलगावकर, चौखंबा कृष्णदास अकादमी, वाराणसी, 2011.
2. श्री सदानन्द प्रणीतः वेदान्तसारः (आचार्य बदरीनाथ शुक्लः हिन्दीव्याख्यानं) मोतीलाल बनारसीदास,वारणासी, 2011

# References

1. *Vedantasara* of Sadanada ( Sanskrit Commentary Vidvanmanoranjini of Ramatirtha), Edited by Avanindra Kumar, Parimal Publications, Delhi- 2011

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# Arthasangraha - Text, Author, Concepts

# BLOCK 3

SGOU

# UNIT 1

# अर्थसंग्रहस्य सामान्यपरिचयः

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहस्य अवबोधनम् जायते।

## Background

भारतीयदर्शनानि सामान्यतः आस्तिकदर्शनम् नास्तिकदर्शनम् इति द्विधा विभज्यन्ते। वेदाः खलु भारतीयचिन्ताः अत्यधिकं प्रभावितवन्तः । यानि दर्शनानि वेदानां परमप्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि च । आस्तिकदर्शनानि षड् सन्ति । तानि च सांख्य- योग- न्याय- वैशेषिक- पूर्वमीमांसा- उत्तरमीमांसा (वेदान्तः) च । चार्वाक- बौद्ध- जैनानि नास्तिकदर्शनानि।

आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। पूर्वमीमांसादर्शने केरलदेशस्य योगदानं महदेव। केरले जातं शाबरभाष्यं महान् स्थानं वहति। शबरस्वामिना रचितं भाष्यमेव शाबरभाष्यम्। मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते। कुमारिलभट्टस्य भाट्टमतम्, तथा प्रभाकरस्य प्राभाकरमतञ्च ।

मीमांसादर्शने प्रकरणग्रन्थरूपेण वर्तमानः लौगाक्षिभास्करेण प्रणीतः अर्थसंग्रहः, अस्य दर्शनस्य तत्त्वानां ज्ञानाय अतीव उपकरोति।अस्मिन् एकके अर्थसंग्रहस्य परिचयं कुर्मः।

## Keywords

अर्थसंग्रहः, लौगाक्षिभास्करः, प्रकरणग्रन्थः, धर्माधर्मविवेचनम्, द्वादशाध्यायः, धर्मजिज्ञासा, चोदनाप्रतिपाद्यविषयः।

## Discussion

अर्थसंग्रहस्य कर्ता - लौगाक्षिभास्करः।

अर्थसंग्रहस्य कर्ता अस्ति आचार्यः लौगाक्षिभास्करः । अयम् आचार्यः मीमांसाशास्त्रे असाधारणः विशिष्टः विद्वान् आसीत् । अस्य अयमर्थसंग्रहग्रन्थः अत्यन्तं लोकप्रसिद्धः । इतिहासज्ञानामभिप्रायानुरोधेन "भास्करः" इति तस्य नामधेयम्। "लौगाक्षी" इति अस्य वंशस्य नामधेयम् । अनेन अयं दाक्षिणात्य इति प्रतीयते। अस्य पिता 'रुद्र' इति उल्लेख उपलभ्यते । अयं १६ शतके (क्रि.अ) आसीदिति ज्ञायते ।

### ग्रन्थस्वरूपम्

मीमांसाशास्त्रे बालानां प्रवेशसिध्यर्थम् अमुम् "अर्थसंग्रहं" लिखितवान् । अयञ्च प्रकरणग्रन्थः । मीमांसान्यायप्रकाशस्य (आपदेवकृतस्य) साररूपः अयम् अर्थसंग्रहः । न्यायप्रकाशस्तु प्रौढः प्रकरणग्रन्थः । अयन्तु अत्यन्तं सरलः । अर्थस्य मीमांसाप्रमेयरूपस्य, संग्रहः-संक्षेपेण स्वरूपकथनम् । मीमांसाप्रविविक्षूणां मीमासाशास्त्रे प्रवेशार्थमयं ग्रन्थः अत्यन्तमुपयुक्तः ।

प्रस्तावना - धर्माधर्मविवेचनार्थं प्रवृत्तं मीमांसाशास्त्रम् । 'धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्' इत्यादिश्रुतिवाक्यैः धर्मस्य पापनाशकत्वं जगदुत्पत्तिस्थितिकारणत्वं

निरतिशयसुखसाधनत्वं च प्रतिपादितम् । तादृशं धर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । धर्म एव अस्य शास्त्रस्य विषयः धर्मज्ञानमेव प्रयोजनम् ।

### 3.1.1.ग्रन्थस्यारम्भः मङ्गलश्च

बालानां मीमांसाशास्त्रे प्रवेशसिद्ध्यर्थम् अर्थसंग्रहाख्यं प्रकरणग्रन्थं विरचयन् मङ्गलमाचरति -

मङ्गलश्लोके महाविष्णुं नमति।

वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः ।

कुरुते जैमिनिनये प्रवेशायार्थसंग्रहम् ॥ इति ।

परमकारुणिकेन भगवता जैमिनिना धर्माधर्मविवेकाय विरचिते पूर्वमीमांसाशास्त्रे बालानां प्रवेशसिद्ध्यर्थम् अर्थसंग्रहग्रन्थं विरचयन् आचार्यः लौगाक्षिभास्करः निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारप्राप्तं देवतानमस्काररूपं मङ्गलम् आरचयति । वासुदेवमित्यादिना ।

वासुदेवं – श्रीमन्नारायणं सर्वनिवासाधिष्ठानं प्रकाशात्मकं ब्रह्मेत्यर्थः । रमाकान्तं रमाया लक्ष्म्याः कान्तं पतिं श्रीमहाविष्णुं नत्वा नमस्कृत्य, देवताविग्रह (शरीरम्) अनङ्गीकर्तॄणां मीमांसकानां कथं लक्ष्मीः, तस्याः पतिः इत्यादिव्यवहारः सङ्गच्छते इति चेत् विग्रहानङ्गीकारेऽपि शब्दरूपदेवतायाः अङ्गीकारेण न दोषः द्रव्यत्यागोद्देश्यविष्णुदेवतायाः स्वीकृतत्वात् । अनधीतमीमांसाशास्त्राणां जैमिनिनये भगवज्जैमिनिप्रणीते कर्मकाण्डात्मकवेदभागविषयके द्वादशाध्यायात्मके पूर्वमीमांसाशास्त्रे अनधीतमीमांसाशास्त्राणां प्रवेशाय अर्थसंग्रहं कुरुते अर्थानां द्वादशाध्याय-प्रतिपाद्यप्रमाणादिपदार्थानां संक्षिप्तशब्दरचनया लक्षणस्वरूपादिकथनरूपं कुरुते विरचयति ।

### 3.1.2.द्वादशलक्षण्यां क्रमेणनिरुपिताः विषयाः

तत्र च द्वादशलक्षण्यां प्रथमाध्याये धर्मप्रमाणानि निरूपितानि । द्वितीयाध्याये भावनाभेदः अथवा तदुपयुक्ततया कर्मभेदः निरूपितः । तृतीयाध्याये अङ्गाङ्गिभावः निरूपितः। चतुर्थे प्रयोज्य-प्रयोजकभावः क्रतुप्रयुक्तानुष्ठेयानां पुरुषार्थप्रयुक्तानुष्ठे-

यानां कर्माणां च परिमाणं विमृष्टम्। पञ्चमेऽध्याये अनुष्ठेयपदार्थानामनुष्ठानक्रमो निरूपितः। षष्ठे विहितकर्म-फलभोक्तृत्वरूपधिकारनिरूपणम् । सप्तमे प्रकृतावुपदिष्टाङ्गानां विकृतौ सामान्यातिदेशो निरूपितः। अष्टमे यत्रातिदेशोऽस्ति यत्र च नास्ति, कर्त्रादीनामतिदेशोऽस्ति नवेत्यादिरूपः विशेषाति-देशः निरूपितः । नवमे प्रकृतावुपदिष्टानां मन्त्र-साम-संस्काराणां विकृतावतिदेशप्राप्तानां प्रकृतिविकृत्योरग्निसूर्यादिदेवतादिभेदे प्रकृतिगतं देवतादिवाचकं पदं विहाय विकृतौ देवतादिवाचकस्य पदस्याध्याहाररूपः ऊहः निरूपितः। यथा- अग्नये जुष्टमिति मन्त्रे प्रकृत्युपदिष्टे विकृतावतिदेशप्राप्तेऽग्निपदपरित्यागेन सूर्यपदाध्याहारः । यथा वा "गिरागिरेति ब्रूयात्" इत्यत्र साम्नि गिरापदस्य परित्यागेन इरापदाध्याहारः साम्नामूहः व्रीह्यादिद्रव्यान्तरसम्बन्धिनश्चावघातादेर्नीवारादिद्रव्यान्तरस म्बन्धः संस्कारकर्मणामूहश्च । दशमे विकृतावतिदेशप्राप्तानां प्राकृताङ्गानामर्थलोपप्रत्याम्नातप्रतिषेधादिना बाधविकृ-तावुपदिष्टेन शरबर्हिषा कुशस्य बाधः । एकादशे चानेकोद्देशेन सकृदनुष्ठानरूपं तन्त्रं निरूपितम् । यथा - पौर्णमास्यां अङ्गत्वेन विहितानां प्रयाजादीनां सकृदनुष्ठानात् त्रयाणां प्रधानानामप्युपकारः सिद्ध्यति । द्वादशे अन्यतः उपकारलाभप्रयुक्ताङ्गाननुष्ठानरूपः प्रसङ्गविचारः निरूपितः। यथा 'पशुयागेषु यदैवत्यः पशुः तदैवत्यः पुरोडाशः' इति नियमेन पशुयागार्थानुष्ठितप्रयाजादिभिः पशुपुरोडाशयागे उपकारः सिद्ध्यतीति पुरोडाशयागार्थं पृथक् प्रयाजाद्यनुष्ठानं नास्ति । प्रसङ्गादेवोपकारसिद्धेः । तथा च ते विचाराः अत्र संक्षेपेण निरूपिताः इत्यर्थसंग्रहमित्यस्योपपत्तिः । तथा च ये च विषयाः जैमिनिप्रणीते मीमांसाशास्त्रे सन्ति त एव अस्याऽपि । तत्प्रकरणत्वात् । प्रकरणग्रन्थत्वाच्च।

धर्म एव अस्य विषयः । धर्मज्ञानं प्रयोजनम् । अधीतषडङ्गवेदो अधिकारी । उपपाद्योपपादकभावः सम्बन्धः । एवं शिष्यशिक्षार्थं मङ्गलं ग्रन्थादौ प्रदर्श्य तन्त्रारम्भकसूत्रं विवृणोति। अथ परमकारुणिको भगवान् जैमिनिः धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय इत्यादिना।

तत्र प्रतिज्ञातमर्थसंग्रहं निरूपयितुं स्वप्रकरणस्य शास्त्रारम्भाधीनारम्भकत्वात् तन्त्रारम्भार्थकं सूत्रमुपस्थापयति। अथातो धर्मजिज्ञासेति।

### 3.1.3.शास्त्रारम्भसूत्रार्थविचारः

अथातो धर्मजिज्ञासा

वेदाध्ययनानन्तरं तदर्थविचारः कर्तव्य इति धर्मजिज्ञासां सूत्रयामासेति तदर्थः। परमकारुणिकः निरुपाधिककरुणायुक्तः अत एव भगवानिति। महर्षिः जैमिनिः आदौ धर्मजिज्ञासां सूत्रयामासेत्यन्वयः। द्वादशलक्षण्याः आरम्भे इत्यर्थः। द्वादशानां लक्षणानामध्यायानां समाहारः द्वादशलक्षणी तां प्रणिनीय आदौ बुद्धौ समारोप्य इति तात्पर्यम्। 'प्रणिनाय' इति पाठान्तरे तु प्रणयनं कृतवानित्यर्थः धर्मविवेकायेत्यधर्मस्याप्युपलक्षणं, तयोर्विवेकाय निर्णयज्ञानायेत्यर्थः। सूत्रार्थं निरूपयति अथेत्यादिना। अस्य प्रथमसूत्रस्य धर्मलक्षणबोधकं चोदनालक्षणोऽर्थो धर्मः इति सूत्रमारभ्य 'अन्वाहार्ये च दर्शनात्' इत्यन्तं जैमिनिप्रणीतं धर्मविचारशास्त्रं विषयः। तत्र संशयः - किमस्य धर्मविचारशास्त्रस्यारम्भोऽध्ययनविध्यप्रयोज्यः उत तत्प्रयोज्यो वेति ?

तत्र यदि स्वाध्यायाध्ययनविधिनाऽर्थज्ञानाय दृष्टप्रयोजनाय वेदाध्ययनं विधियेत तदा तस्य शास्त्रारम्भे प्रयोजकत्वं भवेत्। नैतदस्ति। अन्यथासिद्धत्वात्। तथाहि - किमत्यन्ताप्राप्तार्थज्ञानहेतुः अध्ययनमनेन विधिना विधीयते। किं वा पक्षे अप्राप्तमवघातवन्नियम्यते ? नाद्यः वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वात्, भारताध्ययनवत्, इत्यनुमानेनैवाध्ययनस्यार्थज्ञानहेतुत्वप्राप्तेः। न द्वितीयः अवघातवैषम्यात्। यथा अवघातनिष्पन्नैरेव तण्डुलैरनुष्ठीयमानौ दर्शपूर्णमासाववान्तरापूर्वद्वारेण परमापूर्वं जनयतः, तदपूर्वमेवावघातनियमहेतुः, तथा लिखितपाठेन गुरुपूर्वकाध्ययनेन वार्थज्ञानसम्भवात्पक्षे प्राप्ताध्ययननियमहेतुर्वक्तव्यः। स च नास्ति। लिखितपाठादिजन्यार्थज्ञानेनैव क्रत्वनुष्ठानसिद्धेः प्रयोजकाभावात्। तस्माद्विविधविधिप्रकारासम्भवादर्थज्ञानहेतु-विचारशास्त्रारम्भस्य न विधिप्रयोज्यत्वमिति अभिधीयते

अध्ययनस्यार्थज्ञानहेतुत्वमनुमानसिद्धमिति यदुक्तं न प्राप्ते तदत्यन्तमप्राप्तविधिरिति तद्भवतु। नियमविधिस्तु भवत्येव।

तत्र किं प्रयोजकमिति चेत् सकलक्रत्वपूर्वस्यैव प्रयोजकत्वात् दर्शपूर्णमासजन्यपरमापूर्वस्य अवघातनियमजन्यापूर्वकल्पकत्ववत् क्रतुजन्यापूर्वजातस्य क्रतुज्ञानसाधनाध्ययननियमजन्यापूर्वकल्पकस्य सत्त्वात् नियमादृष्टस्य कल्पनादर्थज्ञानसाधनयोर्लिखितपाठगुरुपूर्वकाध्ययनयोः पक्षे प्राप्तत्वात् यदा गुरुपूर्वकाध्ययनं परित्यज्य लिखितपाठादिनार्थज्ञानं सम्पादयितुम् अर्थज्ञानसम्पन्नः पुरुषः प्रवर्तते तदा नियमादृष्टाय गुरुपूर्वकाध्ययनमेवार्थज्ञानसाधनं विधीयते।

**अध्ययनविधिप्रयुक्त्यैव शास्त्रमारम्भणीयम्**

क्रतुजन्यापूर्वप्रयुक्तनियमादृष्टस्य अस्वीकारे च श्रूयमाणो विधिरनर्थकः स्यात्। अर्थज्ञानरूपदृष्टप्रयोजनाध्ययनस्य विधेयत्वे तु नियमादृष्टस्य क्रतुजन्यापूर्वे क्रतुफले उपयोगो भविष्यति। अध्ययनव्यापारस्य अर्थज्ञानरूपदृष्टफलकत्वे केवलादृष्टार्थकत्वं नोपपद्यते। तथा चोक्तम् –

यतः अर्थज्ञानरूपदृष्टार्थकमतो हेतोः वेदाध्ययनानन्तरं वेदार्थस्य धर्मस्य जिज्ञासा निर्णयहेतुविचारः कर्तव्य इति अध्ययनविधिप्रयुक्त्यैव शास्त्रमारम्भणीयमिति सिद्धं भवति।

### 3.1.4.जिज्ञासापदार्थः

जिज्ञासा - ज्ञातुमिच्छा। इच्छार्थे 'सन्'प्रत्ययः। ज्ञानेच्छा इति यावत्। सा च न पुरुषकृतिजन्या। तस्याः व्यापारागोचरत्वात्। इच्छामात्रेण अनुष्ठानोपयोगी धर्मज्ञानं न सम्भवति। अतः जिज्ञासापदस्य विचारे लक्षणा। जिज्ञासेत्यत्र प्रकृत्या ज्ञानविशिष्टम् अनुष्ठानोपयोगिज्ञानमजहल्लक्षणया बोध्यते। प्रत्ययेन च जहल्लक्षणया साध्यसाधनभावसम्बन्धेनेच्छासाध्यो विचारः बोध्यते। तथा च अस्य मीमांसाशास्त्रारम्भे अध्ययनविधिः प्रयोजक इति अतः शब्दार्थः। तथा च धर्मविचारशास्त्रमिदमारम्भणीयमिति फलति।

ननु विचारविषयस्य धर्मस्य अनिरूपणात्कथमिदं धर्मविचारशास्त्रमारम्भणीयम्? तदनिरूपणं च

लक्षणप्रमाणयोरभावात् । लक्षणप्रमाणाभ्यामेव वस्तुसिद्धिः । तदुक्तं "मानाधीना मेयसिद्धिः, मेयसिद्धिश्च लक्षणादिति । धर्मस्य च नास्ति लक्षणम् । अलौकिकत्वात्, अतीन्द्रियत्वाद्वा । अतः धर्मलक्षणं परिष्कृत्य प्रदर्शनार्थम् उपक्रमते ग्रन्थकारः "अथ को धर्मः, किं तस्य लक्षणमिति चेत् अनर्थफलकत्वादनर्थभूते श्येनादावतिव्याप्तिवारणार्थं इति" । इत्यादि

लक्षणप्रमाणाभ्यामेव वस्तुसिद्धिः।

ननु विहितत्वं धर्मत्वमित्युक्तौ विवाहार्थानृतवदनादेरभ्यनुज्ञाविधिविषयस्य धर्मत्वप्रसङ्गः । किं यागादिरेव धर्मः उत चैत्यवन्दनादिकमपि इत्यर्थः । यागादिरेव इत्येवकारेण चैत्यवन्दनादेर्धर्मत्वं वारयति । धर्मलक्षणञ्च वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति । वेदप्रतिपाद्ये स्वतः सुखादिरूपे स्वर्गादिफले अतिव्याप्तिवारणाय प्रयोजनवदिति । भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति । भोजनं कर्तव्यमिति न वेदेन बोधितव्यम् । यस्य बुभुक्षा जायते सः स्वतः भोजनादौ प्रवर्तते। रागतः प्राप्तत्वात् भोजनादेः। रागतः प्राप्तत्वेन भोजनादौ धर्मत्वं नास्ति । श्येनेनाभिचरन्यजेत" इत्यादिवाक्यविहितश्येनयागादौ अतिव्याप्तिवारणाय अर्थपदम्। श्येनयागस्य वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्मक अभिचाररूप-फलजनकत्वात् न धर्मलक्षणस्य तत्र समन्वयः ।

ननु अर्थपदस्य श्येनयागे न धर्मलक्षणस्य अतिव्याप्ति वारकत्वम्। श्येनयागस्य अर्थत्वात् । श्येनो न नरकं जनयति । श्येनस्य तु शत्रुवधमात्र जनकत्वात् । श्येनफलस्यैव हिंसात्मक अभिचारस्य नरकरूपानिष्टजनकत्वेनाधर्मत्वम् । फले विध्ययोगेन तस्य चोदनागम्यत्वाभावात् । तत्रार्थपदं व्यर्थमेव इत्याशङ्क्य आह मूले "अनर्थफलकत्वात् अनर्थभूते श्येनादावतिव्याप्तिवारणायार्थः इति" इति । श्येनयागस्य साक्षात् हिंसारूपत्वाभावात् निषेधविषयत्वाभावेऽपि तज्जन्यफलस्य अभिचाररूपस्य हिंसात्मकत्वेन निषिद्धत्वात् तज्जनक श्येनयागस्यापि अधर्मत्वम् । तदुक्तं भट्टपादैः श्लोकवार्तिके -

फलतोऽपि च यत्कर्म नानार्थेनानुबध्यते ।

केवल प्रीतिहेतुत्वात् तद्धर्मत्वेन हीष्यते ॥ इति ।

तथा च अर्थत्वे प्रयोजनवत्वे च सति वेदप्रतिपाद्यत्वं धर्मत्वम् इति धर्मलक्षणमुपपन्नं भवति । एवमेव वेदबोधितानिष्टसाधनताकत्वम् अधर्मत्वमिति अधर्मलक्षणमपि अर्थात् सिद्धं भवति । अत्र अनिष्टसाधनताकत्वं विषभक्षणादेरप्यस्तीति तद्वारणाय वेदबोधितत्वमिति। यागादौ वेदबोधितत्वमस्तीति तद्वारणायानिष्टसाधनताकत्वमिति।

चोदनाप्रतिपाद्यः धर्मः

मीमांसासूत्रे चोदनाप्रतिपाद्यः धर्म इत्युक्तम्। प्रकृते अर्थसङ्ग्रहे तु चोदनापदं विहाय लक्षणे वेदप्रतिपाद्यत्वमित्युक्तम्। तथा च सूत्रोक्तधर्मलक्षणस्य अर्थसङ्ग्रहोक्तधर्मलक्षणस्य च परस्परं विरोधः स्यात् इत्याशङ्क्य परिहारः सूचितः । "न चोदनालक्षणोऽर्थो धर्म इति सौत्रतल्लक्षणविरोधः, चोदनापदस्य विधिरूपवेदैकदेशपरत्वात्" इत्यादिना।

तत्र समाधानमेवमाह प्रकरणपठितकृत्स्नवेदपरत्वात्। चोदनापदस्य चोदना (विधिः) तेन ब्रह्ममीमांसाविरोधोऽपि नास्ति चोदनाप्रकरणपठितानामर्थवादमन्त्रादीनां ग्रहणं सम्भवति। स्वप्रकरणपठितत्वात्। तदेकवाक्यत्वाच्च।

ननु "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" इत्यादिवाक्यानां धर्मप्रतिपादकत्वं न सम्भवति इति चेत् विहितस्य परिग्रहमुखेन अथवा अनुष्ठेयत्वेन विधानात् धर्मप्रतिपादकत्वम्। निषिद्धस्य अधर्मत्वेन परित्यागबोधनद्वारा धर्मप्रतिपादकत्वम्। मन्त्राणां तु धर्मत्वेनाभिमतयागादिकर्मसमवेतार्थप्रतिपादकत्वेन धर्मे प्रामाण्यम् । अर्थवादानान्तु निषेध्यस्य कलञ्जभक्षणादेः अप्राशस्त्यबोधकत्वेन वा धर्मे प्रामाण्यम् । एवञ्च सर्वस्यापि वेदभागस्य साक्षात्पम्परया विधेयप्राशस्त्यबोधकत्वेन वा धर्मप्रतिपादकत्वम् । तेन समस्तस्यापि वेदस्य सप्रयोजनवत्वं सिद्धम्।

## Summarised Overview

मीमांसाशास्त्रे बालानां प्रवेशसिद्ध्यर्थम् अमुम् "अर्थसंग्रहं" लिखितवान्। अयञ्च प्रकरणग्रन्थः ।मीमांसान्यायप्रकाशस्य (आपदेवकृतस्य) साररूपः अयम् अर्थसंग्रहः । धर्म एव अस्य शास्त्रस्य विषयः धर्मज्ञानमेव प्रयोजनम् । प्रथमं मङ्गलमाचरति। बालानां मीमांसाशास्त्रे प्रवेशसिद्ध्यर्थम् अर्थसंग्रहाख्यं प्रकरणग्रन्थं विरचयत्।अर्थज्ञानरूपदृष्टार्थकमतो हेतोः वेदाध्ययनानन्तरं वेदार्थस्य धर्मस्य जिज्ञासा निर्णयहेतुविचारः कर्तव्य इति अध्ययनविधिप्रयुक्त्यैव शास्त्रमारम्भणीयमिति सिद्धं भवति। तदनन्तरं जिज्ञासापदस्य विचारः क्रियते।

## Assignments

1.मीमांसादर्शनमधिकृत्य विचारयत।
2.अर्थसंग्रहस्य मङ्गलश्लोकमधिकृत्य विशदयत।
3.द्वादशिलक्षण्यां प्रतिपादितं विषयं किम् ?
4.जिज्ञासापदमधिकृत्य विचारयत।
5.अथातो धर्मजिज्ञासा इति सूत्रं अर्थसंग्रानुसारं निरूपयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Paramahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamaleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.

## References

1. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
2. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# धर्मलक्षणम्

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहे प्रतिपादितं धर्ममधिकृत्य जानाति।

## Background

मीमांसादर्शनानुसारेण मृत्योरनन्तरमपि आत्मसत्ता विद्यते। स्वकृतकर्मानुरूपं फलमंपि प्राप्नोति। अशुभकर्माणां फलमप्यशुभं शुभकर्माणां फलं शुभम्। शुभकर्मफलप्राप्त्यर्थं स्वर्गप्राप्तिर्भवति। श्लोकवार्तिकाख्ये ग्रन्थे लिखितं यत् **धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्** । वेदप्रतिपादितम् इष्टसाधनमेव धर्मः तत् विपरीतः अधर्मः।अस्मिन् एकके अर्थसंग्रहे प्रतिपादितं धर्मविषयं विस्तरेण पठामः।

## Keywords

धर्मः,चोदना, स्वर्गकामो यजेत, अलौकिकत्वम्, स्वतःप्रामाण्यम्, आख्यातत्वम्, लिङ्गत्वम्, अपूर्वः, यागस्य स्वर्गसाधनत्वम्

# Discussion

वेदस्य धर्मप्रतिपादनस्वरूपचिन्तनम् -

कथं वेदः धर्मं बोधयति ? इति जिज्ञासायां वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति धर्मलक्षणे प्रयोजनवत्वं विशेषणं दत्तम्। किं तत्प्रयोजनं किं वा तदुद्देशेन धर्मविधायकं चोदनावाक्यमिति चेत् स च "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवाक्यविहितः यागादिः स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते। यः स्वर्गकामनावान् सः यागं कुर्यादिति।

वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः।

यद्यपि प्रत्यक्षादीनां धर्मे प्रामाण्यं नास्ति । तथा चोदनावाक्यस्यापि न धर्मे प्रामाण्यं सम्भवति । यतः लोके शक्तिग्रहणपूर्वकमाप्तवाक्यस्य प्रामाण्यं दृष्टम् । शक्तिश्च लोकप्रसिद्धे गवादौ गृह्यते । धर्मस्य च अलौकिकत्वात् तत्र शक्तिग्रहणं न सम्भवति। शक्तिग्रहणं विना चोदनावाक्यस्यापि धर्मावबोधकत्वं न सम्भवति। तथापि "प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यादिवाक्येषु । यथा मधुकरशब्दस्य अर्थमजानन् तदन्यपदार्थांश्च जानन् तत्समभिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य सङ्गतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते। तथा "कारीर्या वृष्टिकामो यजेत" इत्यादौ लोकप्रसिद्धार्थवृष्ट्यादिसमभिव्याहारात् अलौकिकेऽपि भावनापदार्थे चोदनायाः सङ्गतिं गृहीत्वा चोदनावाक्यार्थं प्रतिपद्यते इति धर्मबोधकत्वात् चोदनायाः धर्मे अप्रामाण्यं न सम्भवति। एवं धर्मस्य अलौकिकत्वेन प्रमाणान्तरागोचरत्वात् वेदस्य च स्वतःप्रामाण्याभ्युपगमात् न चोदनायाः धर्मबोधने प्रमाणान्तरसापेक्षत्वम् । तेन स्वतः प्रामाण्यं सिद्ध भवति। स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते इत्यस्य अयमभिप्रायः यत् मानसविषयत्वाकारेण स्वर्गं सिद्धवन्निर्दिश्य तत्साधनत्वेन अज्ञानस्य यागस्यानुष्ठेयत्वं प्रतिपाद्यत इति।

ननु "यजेत स्वर्गकामः" इत्यादौ करणत्ववाचकशब्दाभावात् कथं स्वर्गसाधनत्वेन

यागस्य करणत्वं वेदेन प्रतिपाद्यते इत्याशङ्क्य 'यजेत' इत्यत्र प्रकृतिप्रत्यययोर्विभागपुरस्सरं प्रत्ययस्यांशविवेकेन भावनां प्रतिपादयन् तत्सामर्थ्येन यागस्य स्वर्गसाधनत्वं प्रदर्शितम् ।

**यजेत इति पदविमर्शः**

'यजेत' इत्यत्र अस्त्यंशद्वयम् । यजिधातुः प्रत्ययश्च । प्रत्ययेऽप्यस्ति अंशद्वयम् । आख्यातत्वं लिङ्त्वं च । आख्यातत्वं दशलकारसाधारणम् । लिङ्त्वं च केवलं लिङि । प्रत्ययेन भावना बोध्यते । तत्र धात्वर्थः करणमिति भावार्थाधिकरणे सिद्धान्तितम् ।तत्र प्रमाणं च समानपदश्रुतिः ।

अपूर्वमन्तरेण यागस्य स्वर्गसाधनत्वं न सम्भवति।

ननु यागादीनां स्वर्गसाधनत्वं न सम्भवति स्वर्गस्य कालान्तरभावित्वात्। यागस्य च क्रियारूपत्वेन क्रियायाः क्षणिकत्वात् प्रथमक्षणे उत्पद्यते । द्वितीयक्षणे तिष्ठति । तृतीयक्षणे नश्यति । तथा च कथं विनष्टः यागः कालान्तरभाविनः स्वर्गस्य साधनं भवेत् । अपूर्वमन्तरेण यागस्य स्वर्गसाधनत्वं न सम्भवति । अतः मध्ये अपूर्वं कल्प्यते । तथा च यागेनापूर्वं जायते। यागः अपूर्वसाधनं भवेन्नस्वर्गसाधनमिति चेत् यागस्य क्रियारूपत्वेन क्षणिकत्वादेव तस्य स्वर्गसाधनत्वनिर्वाहार्थं मध्ये अवान्तरव्यापारत्वेन अपूर्वं कल्प्यते ।

व्यापारेण व्यापारिणो नान्यथासिद्धिरिति न्यायेन कल्पितमप्यपूर्वे यागस्य न स्वर्गसाधनत्वं हीयते । इदञ्चापूर्वं फलबलात्कल्प्यते । यत्र कार्यं तत्रैव कारणमिति यजमानात्मनि स्वर्गादिफलमुत्पद्यते इति तत्रैव अपूर्वमपि कल्प्यते । अतः यागादेः स्वर्गसाधनत्वे न काप्यनुपपत्तिः ।

भावनाकरणस्य धात्वर्थयागादेः अपूर्वद्वारा स्वर्गादिफलसाधनत्वेन सिद्धत्वात् तन्मूलभूतभावनां निरूपयितुं विधेः विधायकत्वप्रकारं च प्रदर्शयितुं प्रकृतिप्रत्ययादिविभागं प्रदर्श्यते । तद्वारा भावनास्वरूपं प्रतिपाद्य तदर्थविवरणं करोति। उभाभ्यामप्यंशाभ्यां भावनैव उच्यते इति ।

यजेत इत्यत्र प्रत्यये विद्यमान आख्यातत्वलिङ्गत्वांशाभ्यां भावनैव बोध्यते । भावनैव इत्यनेन कर्तृकर्मादिवाचकत्वं वार्यते। कर्ता लक्षणया बोध्यते इति मीमांसकसिद्धान्तात् ।

तत्र लोकप्रसिद्धे गवादौ गृह्यते। धर्मस्य च अलौकिकत्वात् तत्र शक्तिग्रहणं न सम्भवति । शक्तिग्रहणं विना चोदनावाक्यस्यापि धर्मावबोधकत्वं न सम्भवति । तथापि "प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यादिवाक्येषु । यथा मधुकरशब्दस्य अर्थमजानन् तदन्यपदार्थांश्च जानन् तत्समभिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य सङ्गतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते । तथा "कारीर्या वृष्टिकामो यजेत" इत्यादौ लोकप्रसिद्धार्थवृष्ट्यादिसमभिव्याहारात् अलौकिकेऽपि भावनापदार्थे चोदनायाः सङ्गतिं गृहीत्वा चोदनावाक्यार्थं प्रतिपद्यते इति धर्मबोधकत्वात् चोदनायाः धर्मे अप्रामाण्यं न सम्भवति। एवं धर्मस्य अलौकिकत्वेन प्रमाणान्तरागोचरत्वात् वेदस्य च स्वतःप्रामाण्याभ्युपगमात् न चोदनायाः धर्मबोधने प्रमाणान्तरसापेक्षत्वम् । तेन स्वतः प्रामाण्यं सिद्धं भवति । स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते इत्यस्य अयमभिप्रायः यत् मानसविषयत्वाकारेण स्वर्गं सिद्धवन्निर्दिश्य तत्साधनत्वेन अज्ञातस्य यागस्यानुष्ठेयत्वं प्रतिपाद्यत इति।

यागस्य स्वर्गसाधनत्वम्।

ननु "यजेत स्वर्गकामः" इत्यादौ करणत्ववाचकशब्दाभावात् कथं स्वर्गसाधनत्वेन यागस्य करणत्वं वेदेन प्रतिपाद्यते इत्याशङ्क्य 'यजेत' इत्यत्र प्रकृतिप्रत्यययोर्विभागपुरस्सरं प्रत्ययस्यांशविवेकेन भावनां प्रतिपादयन् तत्सामर्थ्येन यागस्य स्वर्गसाधनत्वं प्रदर्शितम् ।

## Summarised Overview

वेदस्य धर्मप्रतिपादनस्वरूपचिन्तनम् अस्मिन् एकके सविस्तरं निरूपितम्।कथं वेदः धर्मं बोधयति इति जिज्ञासायां वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति धर्मलक्षणे प्रयोजनवत्वं विशेषणं दत्तम् । धर्मस्य अलौकिकत्वेन प्रमाणान्तरागोचरत्वात् वेदस्य च स्वतःप्रामाण्याभ्युपगमात् न चोदनायाः धर्मबोधने प्रमाणान्तरसापेक्षत्वम् । तेन स्वतः प्रामाण्यं सिद्धं भवति । स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते इत्यस्य अयमभिप्रायः यत् मानसविषयत्वाकारेण स्वर्गं सिद्धवन्निर्दिश्य तत्साधनत्वेन अज्ञात्तस्य यागस्यानुष्ठेयत्वं प्रतिपाद्यत इति। 'यजेत' इत्यत्र प्रकृतिप्रत्ययोर्विभागपुरस्सरं प्रत्ययस्यांशविवेकेन भावनां प्रतिपादयन् तत्सामर्थ्येन यागस्य स्वर्गसाधनत्वं प्रदर्शितम् ।

## Assignments

1.वेदप्रतिपादितं धर्मस्वरूपं निरूपयत।
2.स्वर्गकामो यजेत इति वेदवाक्यं विचारयत।
3.यजेत इति पदमधिकृत्य विचारयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.


## References


1. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
2. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# भावना

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहानुसारं भावनायाः स्वरूपं जानाति।

## Background

आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। मीमांसादर्शनस्य प्रकरणग्रन्थः भवति अर्थसंग्रहः। अर्थसंग्रहानुसारं अस्मिन् एकके भावनायाः विचारः क्रियते।

## Keywords

भावकव्यापारविशेषः, शाब्दीभावना, आर्थीभावना, लिङाद्यर्थः, इष्टसाधनताज्ञानम्, साध्यम्, साधनम्, इतिकर्तव्यता ।



SGOU

## Discussion

भावना नाम भवितुर्भवनानुकूलो भावकव्यापारविशेषः। भवितुः उत्पद्यमानस्य, - भवनानुकूलः- उत्पत्त्यनुकूलः, भावयितुः उत्पादयितुः प्रयोजकस्य व्यापारविशेषः- भावना इति।

'गामानय' इत्यादिवाक्यबोधितशाब्दभावनायां समन्वयः। भवितुः - उत्पद्यमानायाः - सेवकनिष्ठप्रवृत्तेः भवनानुकूलः उत्पत्त्यनुकूलःभावयितुः प्रवर्तकस्य राजादेः व्यापारविशेषः । गामानय इत्यादि शब्दप्रयोगगम्यः तन्निष्ठः अभिप्रायविशेषः । तण्डुलं पचेत् इत्यत्र भवितुः उत्पद्यमानस्य पाकस्य (विक्लित्तिरूपस्य) भवनानुकूलः - उत्पत्यनुकूलः भावयितुः वाचकस्य व्यापारविशेषः प्रवृत्तिरूपः इति समन्वयः । यजेत स्वर्गकामः इत्यत्र भवितुः उत्पद्यमानस्य धात्वर्थयागादेः भवनानुकूलः - उत्पत्यनुकूलः - स्वर्गकामनावतः पुरुषस्य उत्पद्यमानायाः स्वर्गकामप्रवृत्तेः उत्पत्त्यनुकूलो लिङो व्यापारविशेषः । तथा भवितुः उत्पद्यमानस्य स्वर्गादेः भवनानुकूलः उत्पत्त्यनुकूलः,भावकव्यापारः-यागविषयकः व्यापारविशेषः, यजमानस्य प्रवृत्तिविशेषः-आर्थी भावनेति यावत्।

उत्पादयितुः प्रयोजकस्य व्यापारविशेषः

### 3.3.1.भावनाविभागविचारः

'यजेत' इत्यादौ प्रत्ययघटकलिङ्त्व-आख्यातत्वाभ्याम् अंशाभ्यां भावनैव बोध्यते । तत्र लिङ्त्वांशेन शाब्दीभावना बोध्यते । आख्याततत्वांशेन आर्थीभावना बोध्यते । शब्दसम्बन्धी इयं शाब्दी। अर्थस्य इयम् आर्थी भावना।

शाब्दीभावना आर्थीभावना च।

शाब्दीभावना नाम पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः पुरुषप्रवृत्तिरूपार्थभावनोत्पत्त्यनुकूलो लिङादिशब्दस्य व्यापारविशेषः । शब्दभावनैव लिङ्त्वादिना लिङाद्यर्थः । शब्दभावना लिङ्प्रत्ययार्थः इत्यत्र किं प्रमाणमिति चेत् - लिङ्श्रवणे सर्वत्र प्रकृत्तिजनकव्यापाररूपः अर्थः प्रतीयते। यथा अयं मां प्रवर्तयति इत्येवं रूपः । स च अर्थः नियमेन

लिङ्श्रवणसमनन्तरं प्रतीयते । न कुत्रापि व्यभिचरति । तत्र व्याप्तिरपि सिद्धा वर्तते- योऽर्थः यस्माच्छब्दान्नियमेन बोध्यते सोऽर्थः तस्य शब्दस्य - वाच्यः इति । स च शब्दः तस्यार्थस्य वाचक इति च । यथा 'गामानय' इत्यस्मिन्वाक्ये गोशब्दस्य गोत्वम् । गोशब्दस्य सर्वत्र गोत्वे शक्तिरिति । तेन जातिशक्तिवादिनो मीमांसका इति गम्यते । लोके वेदे च प्रवर्तनात्वेन लिङादिशब्दवाच्या प्रवर्तना शब्दभावनाऽपरपर्याया पुरुषप्रवृत्तिहेतुरिति स्वीकर्तव्यम्। लोके आचार्यराजादिप्रवर्तकपुरुषनिष्ठोऽभिप्रायविशेषः । वेदे तु पुरुषाभावात् लिङादिशब्दनिष्ठः कश्चन अलौकिको धर्मः ।

**यस्माच्छब्दान्नियमेन बोध्यते सोऽर्थः तस्य शब्दस्य वाच्यः**

यथा - 'गामानय' इत्यादिलौकिकवाक्येषु पुरुषनिष्ठोऽभिप्रायविशेषः । यजेत स्वर्गकामः इत्यादिषु वैदिकवाक्येषु लिङादिशब्दनिष्ठः व्यापारविशेषः । अपौरुषेयत्वात् वेदस्य । स च लिङादिशब्दनिष्ठः व्यापारविशेषः प्रवृत्तिविषये यागादौ इष्टसाधनत्वानुमानद्वारा प्रवृत्तिजनकः ।

यागः इष्टसाधनम्, अयमत्र प्रवर्ततामित्याकारकाप्तेच्छाविषयत्वात् इत्यनुमानेन तत्र इष्टसाधनताज्ञानं जायते । तत्र च लोकवेदसाधारण्येन व्यापारत्वं शक्यतावच्छेदकम् । शक्ततावच्छेदकञ्च लिङ्त्वं लेट्त्वलोट्त्वादिकम् । तेन च इष्टसाधनताज्ञानेन व्यापारवती यागादिकृतिः इति विशेषज्ञानं जायते । तेन प्रवृत्तिर्जायते ।

इष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण वेदे लिङाद्यर्थ इति मण्डनमिश्राः । अर्थभावनाभिधानानुकूला लिङादिनिष्ठशक्तिरेव अभिधाख्या प्रवर्तनात्वेन रूपेण लिङादिवाच्या इत्येवं परिकल्प्य तज्ज्ञानस्य प्रवृत्तिं प्रति कारणमिति वेदे कल्प्यते इति पार्थसारथिमिश्राः । लिङादिश्रवणानन्तरं प्रवृत्तिदर्शनात् प्रवृत्तिसामग्रीजननद्वारा लिङादिज्ञानस्य प्रवृत्तावुपयोग इति अविवादम् ।

### 3.3.2.शाब्दीभावनायाः अंशत्रयविचाराः

भावनासामन्येन अंशत्रयविषयिणी आकाङ्क्षा नियता । यत्र भावनाबोधो भवति तत्र सर्वत्र अंशत्रयं वक्तव्यमेव । आकाङ्क्षानुरोधात् । तच्चांशत्रयं साध्यं, साधनम्, इतिकर्तव्यता चेति । तेषामाकारस्तु किं भावयेत् ? केन भावयेत् ? कथं भावयेत्? इति।

#### 3.3.2.1.साध्याकाङ्क्षाविचारः

अंशत्रयम्-साध्यं, साधनम्, इतिकर्तव्यता

शाब्दभावनायाः साध्याकाङ्क्षायां साध्यसाधनेतिकर्तव्यताविशिष्टा आर्थीभावना साध्यत्वेन अन्वेति। तत्र प्रमाणं तु समानाभिधानश्रुतिः । समानम् एकम् अभिधानम् अभिधायकं ययोः तत् समानाभिधानं, समानाभिधाना चासौ श्रुतिश्च - समानाभिधानश्रुतिः । शब्दभावनार्थभावनयो अभिधायकः बोधकः एक एव । प्रत्ययांशेन भावना बोध्यते इति पूर्वं सूचितम् । अतः सन्निहितत्वेन शाब्दीभावनायाः साध्याकाङ्क्षायाम् आर्थी भावना साध्यत्वेन अन्वेति । यद्यपि सङ्ख्याकालयोरपि बोधः प्रत्ययेन भवति । तथा च सङ्ख्यादीनामपि तेनैव प्रत्ययेन बोधनात् तेषामपि साध्यत्वेनान्वयः भवतु इति चेत् सङ्ख्यादीनां कृतिसाध्यत्वाभावात्, अपुरुषार्थत्वेन पुरुषार्थसाधनता शून्यत्वाच्च सङ्ख्यादीनां साध्यत्वेनान्वययोग्यता नास्ति। शब्दभावनायाः भाव्याकाङ्क्षासद्भावात् भाव्यान्तरस्य अदर्शनात्, अर्थभावनायाश्च विधिप्रयोज्यत्वात् पुरुषार्थानुबन्धित्वाच्च तस्याः अर्थभावना एव शब्दभावनाभाव्यत्वेन अन्वयः ।

#### 3.3.2.2.साधनाकाङ्क्षाविचारः

शाब्दीभावनायाः साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति करणान्तरस्यादर्शनात् लिङादिविधिशब्दज्ञानमेव करणांशं पूरयति । तस्य च करणत्वं न भावनोत्पादकत्वेन । उत्पादकत्वं करणत्वमिति नार्थ इति भावः । यद्युत्पादकत्वं करणत्वं पूर्वमविद्यमानस्योत्पादकत्वं स्यात् । तदा भावना शब्दधर्म इति न स्यात् । किन्तु

भावनारूपोऽर्थः शब्दस्वभावसिद्धः धर्मः । अतः नान्येनोत्पन्नः । किन्तु भावनाज्ञापकत्वं भावना करणत्वम् । ज्ञापकत्वञ्चात्र प्रकाशकत्वम् । अथवा भावनाकरणत्वं पारिभाषिकम् । भावनाकरणत्वञ्च भावनाभव्यनिर्वर्तकत्वम् । शाब्दीभावनायां यत् भाव्यम् अर्थभावनारूपं तन्निर्वर्तकत्वम् । यथा - कुठारस्य छिदिक्रियाभाव्यद्वैधीभावनिर्वर्तकत्वेन छिदिभावना करणत्वं तथा लिङादिज्ञानस्य शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वेन शब्दभावनाकरणत्वम् । चक्षुः सन्निकर्षादेः पूर्वं रूपादिज्ञानस्याभावेन सन्निकर्षानन्तरमेव रूपादिज्ञानोत्पत्तेः तत्र तत्र सन्निकर्षादः तत्साधकत्वेन तत्करणत्वमुपपद्यते । शब्दभावनायास्तु पूर्वमपि शब्दे सत्वेन लिङादिज्ञानस्य तदुत्पादकत्वेन तत्करणत्वासम्भवात् तद्भाव्यार्थभावनानिर्वर्तकत्वेन तस्य शाब्दभावनाकरणत्वम् ।

### 3.3.2.3.इतिकर्तव्यताविचारः

शाब्दभावनाया इतिकर्तव्यताकाङ्क्षायाम् अर्थवादज्ञाप्यं प्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति । लिङादिज्ञानेन यागादौ प्रवृत्तिं भावयेदित्युक्ते सर्वेषां प्रवृत्तिः भवेत् । किन्तु तथा न दृश्यते। कुतः इति चेत् सर्वेषां प्राशस्त्यज्ञानाभावेन रुचिजननाभावात् तत्र प्रवृत्तिः न जायते । यस्य पुरुषस्य अर्थवादादिना कर्मप्राशस्त्यज्ञानं भवति, तस्यैव तत्र फलरागः उदेति । ततः शीघ्रं प्रवृत्तिः जायते । कर्तव्यस्य इति प्रकारः इतिकर्तव्यः तस्य भावः इतिकर्तव्यता । इतिशब्दः प्रकारवाचकः। प्रकारश्च सामान्यस्य भेदको विशेषः । तथा च कर्तव्यसामान्यस्य भेदकः कर्तव्यविशेष एव भवति । स च कर्तव्यविशेषः शब्दभावनायामितिकर्तव्यतात्वेनान्वयं लभते । तत्र कर्तव्यसामान्यं च लिङादिज्ञानरूपं भावनाकरणमेव । करणगतप्रकाराकाङ्क्षापूरकस्येतिकर्तव्यतात्वात् । लिङादिज्ञानेन प्रवृत्तिं भावयेत् इत्युक्ते कथमित्याकाङ्क्षायां कर्मप्राशस्त्यविशिष्टेनेति प्रकारतया अन्वयः तस्य प्राशस्त्यस्य ज्ञापकः अर्थवादः ।

कर्तव्यस्य इति प्रकारः इतिकर्तव्यः तस्य भावः इतिकर्तव्यता।

### 3.3.3.आर्थीभावना

अर्थभावना प्रयोजनस्य प्रयोजनेच्छाजनितक्रिया-विषयव्यापारः स्वर्गादिरूपफलस्य या इच्छा रागविशेषः तेन रागविशेषेण जनितो यो यागादिक्रियाविषयः पुरुषस्य व्यापारविशेषः सा आर्थीभावना इत्यर्थः ।

कोऽसौ व्यापारविशेषः आर्थीभावना नाम ? स्पन्द इति चेत् 'ग्रामं गच्छति', 'स्वर्गकामो यजेत' इत्यादौ गमनाद्यनुकूलकृतावव्याप्तेः । कृतेः चेतनधर्मत्वेन तत्र स्पन्दत्वाभावात् ।

स्वर्गादिफलेच्छाजनितो यागादि क्रियाविषयः प्रयत्नः एव अर्थभावना ।

स्वर्गादिफलेच्छाजनितो यागादि क्रियाविषयः प्रयत्न एव अर्थभावनात्वेनोच्यते । रथो गच्छति इत्यत्र तु अश्वानां प्रयत्नं रथे आरोप्य रथो गच्छति इति प्रयोगोपपद्यते । येषां मतेऽन्योत्पादनानुकूलव्यापारसामान्यमेवार्थभावना तेषामपि रथे गमनव्यतिरिक्तस्य व्यापारविशेषस्यानुपलब्धेः रथो गच्छतीति प्रयोगस्य गौणत्वं स्वीकर्तव्यम् । स च प्रयत्नः आख्यातसामान्येन कथ्यते । 'यजेत' 'पचति' 'गच्छति' इत्याख्यातश्रवणे प्रयत्नप्रतीतेः । पाकं करोति, पचति, यजति यागं करोति, गच्छति गमनं करोति इति यत्नार्थककरोतिना आख्यातस्य विवरणदर्शनात् प्रयत्न एव आख्यातसामान्यार्थ इति लभ्यते । प्रयत्नपूर्वकगमनादिकर्तरि गमनं करोति पाकं करोति इति प्रयत्नार्थककरोतिप्रयोगदर्शनात् । अन्योत्पादनानुकूलव्यापारः आख्यातसामान्यस्य अर्थ इति केचन आचार्या अभिप्रयन्ति । तस्यापि अयमेव आशयः । प्रयोजनेच्छाजनितस्य यागादिविषयकव्यापारस्य यत्नत्वमेव कल्प्यते । चेतनव्यापारत्वात् । सा च आर्थी भावना प्रत्ययघटकाख्यातत्वांशेन उच्यते । आख्यातसामान्यस्य व्यापारोऽर्थः ।

#### 3.3.3.1.आर्थीभावनायाः अंशत्रयविचारः

भावनासामान्येन शाब्दभावनावत् अर्थभावनायामपि अंशत्रयमस्त्येव । साध्यं, साधनम्, इतिकर्तव्यता चेति । आर्थीभावनयाः साध्याकांक्षायां स्वर्गादिफलं साध्यत्वेन

दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्।

सम्बध्यते । समानपदश्रुत्या यागस्यैव साध्यत्वेनान्वयो भवतु इति चेत् यद्यपि प्रमाणबलाबलविचारे पदान्तरोपात्तफलस्य साध्यत्वेनान्वयापेक्षया प्रबलं सन्निहिता च समानपदश्रुतिः। किन्तु प्रमेयावलोकने प्रबलसमानपदश्रुत्या बोधितत्वेऽपि धात्वर्थयागस्य अपुरुषार्थत्वेन पदान्तरोपात्तमपि स्वर्गादिफलं साध्यत्वेनान्वयं भजते। अतश्च स्वर्गं भावयेत् इति बोधो जायते। केन स्वर्गं भावयेत् इत्याकारक करणाकांक्षायां धात्वर्थयागादिः करणत्वेन अन्वेति। यागेन स्वर्गं भावयेत् इति। अत्र प्रमाणं तु पदश्रुतिः। अथवा समानपदश्रुतिः। एकेनैव पदेन प्रकृतिभागेन यागः बोध्यते। प्रत्ययभागेन यत्नः (आर्थीभावना) बोध्यते इति उभयोरेकपदबोधितत्वेन एकपदश्रुतिः अथवा समानपदश्रुतिरिरिति व्यवहारः। अतश्च भावार्थाधिकरणन्यायेन धात्वर्थस्य पदश्रुत्या आख्यातार्थर्थिभावनायां करणत्वेनान्वयः।

इतिकर्तव्यताकांक्षायाम् अग्न्यन्वाधानप्रयाजानुयाजास्विष्टकृदाद्यङ्गसमूहः इतिकर्तव्यतात्वेन अन्वयं प्राप्नोति । प्रयाजादिभिरुपकारं सम्पाद्य 'दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्' इत्यादिरूपः। कथंभावाकांक्षापूरकत्वम् इतिकर्तव्यतात्वम्।

ननु यागस्य क्षणिकत्वात् कथं कालान्तरभाविस्वर्गादिसाधनसमर्थो भवेत् यागः ? । कुतः - यागः क्रियारूपः क्रिया च क्षणिका, तृतीयक्षणे नश्यति। तथा च कथं अविद्यमानो यागः कालान्तरभावि फलं प्रति साधनं (कारणम्) भवेत्। कार्यकारणयोः सामानाधिकरण्यं लोके दृष्टम्। यस्मिन् देशे काले च दण्डचक्रकुलालादिरूपं समस्तं कारणं तत्रैव घटादिकार्यमिति लोके दृष्टमिति प्रकृते कथं निर्वाहः भवेदिति चेत् - तन्निर्वाहार्थमेव अपूर्वं कल्प्यते। तच्चापूर्वं फलबलात्कल्प्यते। तत्र श्रुतार्थापत्तिरेव प्रमाणम् । वेदवाक्येन 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिना यागस्वर्गादिफलयोः साध्यसाधनभावः विहितः । यागस्तु क्षणिक इति श्रुतसाध्यसाधनभावान्यथाऽनुपपत्या (अर्थापत्या) अपूर्वं कल्प्यते। फलबलात्कल्प्यत इतिकृत्वा यत्र स्वर्गादिफलं तत्रैवापूर्वमिति परमापूर्वं यजमानात्मन्येव कल्प्यते।

अङ्गापूर्वाणि,उत्पत्य पूर्वाणि,समुदायापूर्वाणि फलापूर्वमिति भिन्नानि

तानि च अपूर्वाणि अनेकविधानि । अङ्गापूर्वाणि, उत्पत्यपूर्वाणि, समुदायापूर्वाणि, परमापूर्वमथवा फलापूर्वमिति भिन्नानि । परमापूर्वं परं सर्वत्र फलाव्यवहितपूर्वत्वात् यजमानात्मन्येव । अन्यानि तु व्रीह्यादिद्रव्याश्रितत्वेन, क्वचित् गुणाश्रितत्वेन इति यथायथं कल्प्यते । तच्च फलपर्यन्तं तिष्ठति । सन्निपत्योपकारकाङ्गानां तु उत्पत्यपूर्वजनने उपयोगः । एवञ्च यागावान्तरव्यापारत्वेन अङ्गीकारात् यागः स्वजन्यापूर्वद्वारा कालान्तरभाविनं फलं प्रति कारणं भवतीति फलभावनायां यागस्य करणत्वेनान्वये न किञ्चिद्बाधकम् ।

## Summarised Overview

अस्मिन् एकके भावनायाः विचारः अतिगहनतया कृतः। भवितुः उत्पद्यमानस्य, - भवनानुकूलः- उत्पत्त्यनुकूलः, भावयितुः उत्पादयितुः प्रयोजकस्य व्यापारविशेषः- भावना इति ।शाब्दभावना नाम पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः पुरुषप्रवृत्तिरूपार्थभावनोत्पत्त्यनुकूलो लिङादिशब्दस्य व्यापारविशेषः । तदनन्तरं शाब्दभावनायाः अंशत्रयं विचार्यते।तच्चांशत्रयं साध्यं, साधनम्, इतिकर्तव्यता चेति । अर्थभावना प्रयोजनस्य प्रयोजनेच्छाजनितक्रियाविषयव्यापारः स्वर्गादिरूपफलस्य या इच्छा रागविशेषः तेन रागविशेषेण जनितो यो यागादिक्रियाविषयः पुरुषस्य व्यापारविशेषः सा आर्थीभावना इत्यर्थः । अनन्तरं अर्थभावनायाः अंशत्रयं विचारितम्।

## Assignments

1. भावना नाम का इति विचार्यत।
2. शाब्दीभावनां प्रति निरूपयत।
3. आर्थीभावनां प्रति विचार्यत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.


## References


**1.**Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

**2.**Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# चतुर्विधविधयः सोदाहरणम्

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहानुसारं विधेः ज्ञानं प्राप्नोति।

## Background

आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी।मीमांसादर्शनस्य प्रकरणग्रन्थः भवति अर्थसंग्रहः। अर्थसंग्रहानुसारं अस्मिन् एकके चतुर्विधविधयः सोदोहारणं विचार्यते।

## Keywords

विधिः, योजना, उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारिविधिः, कर्मस्वरूपः, अङ्गप्रधानसंबन्धबोधकः

## Discussion

पञ्चविधेषु वेदभागेषु विधिर्नाम अज्ञातार्थज्ञापको वेदभागो विधिः । अज्ञातस्य प्रयोजनवतोऽर्थस्य यागादिरूपस्य ज्ञापकः वेदभागः इत्यर्थः । विधिः योऽर्थः प्रत्यक्षादिप्रमाणान्तरेण अज्ञातः तादृशमर्थं विधत्ते । तेन अज्ञातप्रयोजनवदर्थविधानेन अर्थवान् विधिरिति योजना । उदाहरणे समन्वयपुरस्सरं प्रदर्शयति । 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति अधिकारविधिः । अग्निहोत्रहोमः स्वर्गसाधनमिति विधिना बोध्यते । अत्र प्रमाणान्तरेण अज्ञातं स्वर्गरूपप्रयोजनविशिष्टं होमं विदधाति अयं विधिः । पूर्वोक्तरीत्या लिङर्थः प्रवर्तना (शाब्दभावना)। आख्यातर्थः आर्थभावना । धात्वर्थः होमः, स च अर्थभावनायां करणत्वेनान्वेति । स्वर्गादिफलं साध्यत्वेनान्वेति । प्रकरणपठितानां अग्न्यन्वाधानादिरूपं अङ्गजातं इतिकर्तव्यतात्वेन अन्वेति स्वर्गभाव्यका अग्निहोत्रहोमकरणिका प्राकरणिकाङ्गोपकृता, शाब्दभावनाप्रयोज्या अर्थभावना, इति अग्निहोत्रहोमः स्वर्गसाधनमिति । अयमग्निहोत्रहोमः स्वर्गसाधनमिति वेदवाक्यभिन्नेन न केनापि प्रमाणेन बोध्यते । अत अयं विधिः लक्षणलक्षितः ।

अज्ञातार्थज्ञापको वेदभागो विधिः

### 3.4.1.गुणविधिविचारः

गुणविधिस्तु प्रमाणान्तरेणाप्राप्तं गुणमात्रं विधत्ते । अत्र गुणो नाम अङ्गम् । अङ्गविधिरिति यावत् । यत्र प्रधानयागः (कर्म) प्रमाणान्तरेण प्राप्तः, तत्र प्राप्तकर्मोद्देशेन गुणमात्रं विधत्ते । तस्य गुणविधिरिति । यथा "दध्ना जुहोति" इति । अयं विधिः अग्निहोत्रप्रकरणे श्रूयते । अतः प्रकरणप्रमाणेन अग्निहोत्रहोमः प्राप्तः । अतः अनेन विधिना प्राप्तमग्निहोत्रहोममुद्दिश्य अप्राप्तः दधिरूपः गुणः विधीयते । दध्ना होमं भावयेदिति । अप्राप्ते अर्थे विधिरर्थवान् इति ।

प्रमाणान्तरेणाप्राप्तं गुणमात्रं विधत्ते ।

यत्र तु गुणस्यापि प्रमाणान्तरेण अप्राप्तिः, कर्मणः अपि अप्राप्तिः तत्र विशिष्टविधानम् । गुणविशिष्टकर्मविधानमिति तदर्थः । यथा- 'सोमेन यजेत' इत्यत्र सोमरूपगुणस्य यागस्य च उभयोरपि

सोमेन यजेत ।

अनेनैव वाक्येन विधानम् । तत्र सोमविशिष्टयागविधानम् । अत्र सोमः द्रव्यम्। यागस्तु क्रिया इति उभयोरन्वयः स्वरसतः न सम्भवति । यागे द्रव्यवैशिष्ट्यं वक्तव्यम् । तच्च द्रव्यत्वेन अन्वयद्वारा । तदा च सोमवान् यागः, तेन इष्टं भावयेत् इति बोधो भवति । तदा च सोमपदे मत्वर्थलक्षणा स्वीकर्तव्या । सोमद्रव्यमस्मिन्नस्तीति सोमवान् यागः इति । तदा विशिष्टविधानं भवति । सोमवता यागेन इष्टं भावयेत् इति । यदि विशिष्टविधानं नाङ्गीक्रियते । तदा सोमेन यागं भावयेत्, यागेन इष्टं भावयेत् इति वाक्यद्वयं कल्पनीयम् । तदा च विध्यावृत्तिलक्षणः वाक्यभेदः । अतः सोमपदे मत्वर्थलक्षणया वाक्यार्थबोधः अङ्गीक्रियते । विशिष्टविधाने च विशिष्टस्य एकत्वात् न वाक्यभेदः ।

सोमेन यागं भावयेत्, यागेन इष्टं भावयेत् इति तन्त्रेणान्वयो भवतु इति चेत् तदा च प्रथमवाक्ये उद्देश्यत्वेन अन्वितस्य यागस्य द्वितीयवाक्ये विधेयत्वेनान्वयः प्रधानत्वेन अन्वितस्य गुणत्वेनान्वयः । तथा प्राप्तत्वं अज्ञातत्वमिति विरुद्धत्रिकद्वयापत्तिः । विशिष्टविधौ च न वाक्यभेदः । "अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः"। इति विशिष्टविधौ च विशेषणविधिरार्थिकः इति विशेषणे पृथक् विधिव्यापारो नास्ति।

### 3.4.2.उत्पत्तिविधिः

सचायं अज्ञातार्थज्ञापकवेदभागरूपः विधिः स्वरूपानुरोधेन चतुर्धा विभजते-उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति" ।

यद्यपि विधित्वेन विधेरेकत्वेऽपि अवान्तरभेदमङ्गीकृत्य चतुर्धा विभागः प्रदर्शितः । चतुःप्रकार इति यावत् । चतुर्णां विधिप्रकाराणाम् मध्ये आद्यः प्रकारः उत्पत्तिविधिः। कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः । "कर्मस्वरूपमेव कर्मस्वरूपमात्रम्" उत्पत्तिशब्दस्य कर्मस्वरूपमित्यर्थः । तद्बोधको विधिः उत्पत्तिविधिः । तेन फलसम्बन्धादेर्व्यावृत्तिः । उदाहरणम् – 'अग्निहोत्रं जुहोतीति' । इदं च अग्निहोत्रहोमस्य

उत्पत्तिविधिवाक्यम् । अत्र अग्निहोत्रमिति कर्मणः नामधेयम् । तस्य धात्वर्थे होमे सामानाधिकरण्येनान्वयः । धात्वर्थस्य फलभावनायां करणत्वेनान्वयः । तथा च 'अग्निहोत्रनामकेन होमेन इष्टं भावयेत्' इति बोधः । किं तदिष्टमिति जिज्ञासायाम् अधिकारविधिना तस्य फलसम्बन्धः बोध्यते । उत्पत्तिविधौ इष्टबोधकपदाभावात् कथं इष्टभाव्यकत्वेन बोध इति चेत् विधिरेव - स्वविधिविधेयसाध्यसिध्यर्थम् इष्टसाधनत्वमाक्षिपति । यत्किञ्चिदिष्टं भावयेदिति । इष्टविशेषबोधस्तु अधिकारविधिना समर्प्यते । अन्यथा तस्य प्रयोजनाभावेन अपुरुषार्थत्वप्रसङ्गात् कर्मणि पुरुषप्रवृत्तिरेव न स्यात् ।

### 3.3.3.विनियोगविधिः-

अङ्गप्रधानसंबन्धबोधको विधिः विनियोगविधिः । विनियोगो नाम अङ्गप्रधानसंबन्धः । तद्बोधको विधिः विनियोगविधिरिति यावत् । उदाहरणम् – 'दध्ना जुहोति' इति । दध्ना इति तृतीया श्रूयते । तृतीयायाः करणत्वमर्थः । इदं च वाक्यम् अग्निहोत्रप्रकरणे श्रूयते । तृतीयया अङ्गत्वं बोध्यते । तृतीयाविभक्त्या अवगताङ्गभावस्य दध्नः प्रकरणप्राप्तस्य अग्निहोत्रहोमस्य संबन्धं विधत्ते अयं विधिः । अतश्च दध्ना होमं भावयेत् इति बोधो जायते। गुणविधौ सर्वत्र धात्वर्थस्य भावनायां साध्यत्वेन अन्वयः ।

गुणस्य दध्नः करणत्वेनान्वये साध्यं किमिति चेत् - धात्वर्थ एव । धात्वर्थहोमोद्देश्येन दध्नः द्रव्यस्य विधानम् । गुणविधौ धात्वर्थस्य होमादेः साध्यत्वेनैव अन्वय इति कथनेन करणत्वान्वयादेः व्यावृत्तिः । तेन विरुद्धत्रिकद्वयापत्तिदोषोऽपि नास्ति ।

धात्वर्थस्य आश्रयत्वान्वयनिरूपणम् क्वचित् धात्वर्थस्य आश्रयत्वेनान्वयः । यथा दध्नेन्द्रियकामस्य जुहुयात् इत्यत्र । अत्र दध्नः फलसंबन्धः बोध्यते । दध्ना इन्द्रियरूपफलं भावयेत् इति । किञ्चिदाश्रयं विना द्रव्यस्य फलसाधनत्वस्वीकारे शिखिस्थ दध्नः अपि (उदासीनदध्नः) इन्द्रियरूपफलजनकत्वं स्यात् । अतः आश्रयापेक्षायां वाक्ये सन्निधिप्राप्तहोमः आश्रयत्वेन अन्वेति । यदि द्रव्यस्य होमसंबन्धमात्रमङ्गीक्रियते तदा फलबोधकस्य

पदस्य अन्वयो न भवति। फलपदं व्यर्थं भवति। यदि होमस्य फलसंबन्धः स्वीक्रियते तदा गुणबोधकपदस्य अन्वयाभावेन आनर्थक्यं स्यात्। होमोद्देश्येन गुणस्यापि विधानं, फलस्यापि विधानमित्यङ्गीकारे अनेकविधाननिमित्तकवाक्यभेदप्रसङ्गः। अतश्च दध्नः फलसंबन्धः विधीयते। दध्ना इन्द्रियं भावयेत् इति। तच्च किन्निष्ठमिति आश्रयापेक्षायां धात्वर्थस्य होमस्य आश्रयत्वेनान्वयः। एवञ्च होमाश्रितेन दध्ना इन्द्रियरूपफलं भावयेदिति वाक्यार्थबोधो जायते। इदानीं कस्यापि वैय्यर्थ्यं नास्ति। यच्च दधि होमे (प्रकरणप्राप्ताग्निहोत्रहोमे) द्रव्यत्वेन अन्वितं वर्तते तस्यैव इन्द्रियफलजनकत्वं नान्यस्य दध्न इति च सिध्यति। कस्यापि पदस्य वैयर्थ्यमपि नास्ति।

### 3.4.3.1.विनियोगविधेः षट्प्रमाणानि

श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याः षड्प्रमाणानि

एतस्य अङ्गाङ्गिभावबोधकस्य विनियोगविधेः सहकारिभूतानि षट्प्रमाणानि सन्ति। तानि च श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि एतदन्यतमप्रमाणसह-कृतेनानेन विनियोगविधिना अङ्गत्वं बोध्यते। अनेन विधिना अङ्गत्वं ज्ञाप्यते। अङ्गत्वं च पारार्थ्यापरपर्यायम्। पारार्थ्यञ्च परार्थत्वम्। तच्च परोद्देश्यप्रवृत्तकृतिसाध्यत्वरूपम्। दर्शपूर्णमासौ स्वर्गाङ्गमित्यत्र समन्वयः। यथा परोद्देश्येन स्वर्गोद्देश्येन, प्रवृत्तो यः पुरुषः यजमानः तस्य कृतौ यागानुकूलायां कारकत्वेन- करणत्वेन यागस्य अन्वयात्-यागः स्वर्गाङ्गम्। एवं प्रयाजादयः दर्शपूर्णमासाङ्गमित्यत्र - परोद्देश्येन - यागोद्देश्येन प्रवृत्तो यः पुरुषः यजमानः तस्य यागानुकूलायां कृतौ व्याप्यत्वं प्रयाजादीनामिति प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम्।

### 3.4.4.प्रयोगविधिः

प्रयोगप्राशुभावबोध-को विधिः प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। अयं च अङ्गवाक्येन सह एकवाक्यतामापन्नः प्रधानविधिरेव। प्रयोगविधिरिति अतिरिक्तः नास्त्येव। स च अविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। विलम्बेन क्रियमाणे इदमनेन सह कृतमिति साहित्यव्यवहारो न स्यात्। स चाविलम्बः नियते क्रमे आश्रीयमाणे भवति। अन्यथा प्रयोगविक्षेपापत्तिः। अतः

प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते इति अङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम् ।

तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा । "तत्तत्पदार्थानन्तरं तत्तत्पदार्था" इत्येवं अनेके पदार्थवृत्तिपौर्वापर्यसमुदायरूपविततिरेव क्रम इति ।एतस्य प्रयोगविधेः सहकारिभूतानि षट्प्रमाणानि । श्रुति-अर्थ-पाठ-स्थान-मुख्य- प्रवृत्याख्यानि ।

### 3.4.5.अधिकारविधिः

कर्मजन्यफलसाम्यबोधको विधिः अधिकारविधिः । कर्मजन्यफलस्वाम्यञ्च कर्मजन्यफलभोक्तृत्वम् । स्वर्गोद्देश्येन यः यागमनुतिष्ठति तस्य यजमानस्य स्वर्गकामनावतः पुरुषस्य यागजन्यस्वर्गफलस्य भोक्तृत्वम् अनेन "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति वाक्येन बोध्यते।

कर्मजन्यफलसाम्य बोधको विधिः अधिकारविधिः

तच्च फलभोक्तृत्वं यस्तु अधिकारविशिष्टः तस्यैव । यथा काम्ये कर्मणि फलकामना। नैमित्तिके कर्मणि निमित्तनिश्चयः । नित्ये शुचिविहितकालजीवित्वमिति । अध्ययनविधिसिद्धा विद्या सर्वसाधारण्येन वैदिककर्मसु अधिकारिविशेषणम् । अग्निसाध्य-कर्मसु आधानविधिसिध्दा अग्निमत्ता । एवं सामर्थ्यमपि अधिकारिविशेषणम् । एवम् अधिकारविधिस्वरूपस्य संक्षिप्तपरिचयः ।

## Summarised Overview

अस्मिन् एकके अर्थसंग्रहस्य  सप्रमाणः चतुर्विधविधयः सोदाहरणं विचारितः। पञ्चविधेषु वेदभागेषु विधिर्नाम अज्ञातार्थज्ञापको वेदभागो विधिः । अज्ञातस्य प्रयोजनवतोऽर्थस्य यागादिरूपस्य ज्ञापकः वेदभागः इत्यर्थः । सचायं अज्ञातार्थज्ञापकवेदभागरूपः विधिः स्वरूपानुरोधेन चतुर्धा विभजते "उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति" । कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः ।अङ्गप्रधानसंबन्धबोधको विधिः विनियोगविधिः । विनियोगविधेः सहकारिभूतानि षट्प्रमाणानि सन्ति । तानि च श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि ।प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः ।कर्मजन्यफलस्वाम्यबोधको विधिः अधिकारविधिः ।

## Assignments

1.अर्थसंग्रहानुसारं विधिं निरूपयत।
2.उत्पत्तिविधिं सोदोहरणं विशदयत।
3.विनियोगविधिं सविस्तरं प्रतिपादयत।
4.प्रयोगविधिं सोदोहारणं निरूपयत।
5.अधिकारिविधिं सविस्तरं निरूपयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications,Kalady

## References

**1.**Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

**2.**Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# Arthasangraha - Concepts

# BLOCK 4

SGOU

UNIT 1

# मन्त्रः

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- मन्त्राणां स्वरूपं जानाति।

## Background

आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्। अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। मीमांसादर्शनस्य प्रकरणग्रन्थः भवति अर्थसंग्रहः। अर्थसंग्रहानुसारं अस्मिन् एकके चतुर्विधविधयः सोदोहारणं विचार्यते।

मननात् त्रायते इति मन्त्रः। वेदेषु अधिकतया मन्त्रान् एव द्रष्टुं शक्यते। मन्त्राणां समूहः सूक्तरूपेण ज्ञायते। अर्थसंग्रहस्य अस्मिन् एकके मन्त्रस्य विचारः क्रियते।

## Keywords

प्रयोगसमवेतार्थस्मारकत्वम्, अदृष्टं, अपूर्वविधिः, नियमविधिः, परिसंख्याविधिः, श्रुतहानिः, अश्रुतकल्पना, प्राप्तबाधः, उच्चारणमापदृष्टार्थम्।

# Discussion

#### 4.1.1.मन्त्रः

प्रयोगसमवेतार्थस्मारकत्वं मन्त्रत्वम् । तेषां कर्मसमवेतार्थस्मारकत्वेन अर्थत्वम् । न तु तदुच्चारणमात्रेण अदृष्टं लभ्यते । "दृष्टे संभवति अदृष्टफलकल्पना अन्याय्या" इति न्यायात् । कर्मविषयकज्ञानस्य प्रमाणान्तरेणापि सिद्धौ मन्त्राम्नायं व्यर्थमिति न चिन्तनीयम् । "मन्त्रैरेव मन्त्रार्थः स्मर्तव्य" इति नियमविध्यङ्गीकारात् । यत्र परं मन्त्रस्य अर्थ एव नास्ति स्तोभाक्षरादिषु । तत्र उच्चारणमात्रमदृष्टार्थम् । साममन्त्राणान्तु ऋगाक्षराभिव्यक्तिरेव दृष्टं प्रयोजनमिति सर्वत्र मन्त्रेषु प्रयोजनवत्वं सिद्ध्यति ।

प्रयोगसमवेतार्थस्मा-रकत्वं मन्त्रत्वम्

#### 4.1.2.विधिनिरूपणम्

"मन्त्रैरेव मन्त्रार्थः स्मर्तव्य" इति नियमविध्यङ्गीकारात् इत्यनुसारेण अत्र विधेः विचारः क्रियते। भट्टपादैः विधिः त्रिधा विभक्तः । अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति ।

तदुक्तम् –

**विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।**

**तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥ इति ।**

#### 4.1.2.1.अपूर्विधिः

केनापि प्रमाणेन अज्ञातर्थबोधकः विधिः अपूर्वविधिः । "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादयः । ज्योतिष्टोमः स्वर्गसाधनमिति अनेनैव विधिना बोध्यते नान्येन प्रमाणेन इति अयमपूर्वविधिः ।

अपूर्वविधिः
नियमविधिः
परिसंख्याविधिश्च ।

#### 4.1.2.2.नियमविधिः

पक्षे अप्राप्तांशपूरकः विधिः नियमविधिः । "व्रीहीनवहन्ति" इति। नखविदलनादिपक्षे अप्राप्तस्य अवहननस्य विधानात् अयं नियमविधिः । अवहननविधानं न विधेः फलम् । अवहननस्य लोकसिद्धोपायान्तर्गतत्वात् । किन्तु अवघातेनैव इति नियमः

विधेः फलम् । नियमस्य परं नियमापूर्वं प्रयोजनम् । अवघातनिष्पन्नैरेव तण्डुलैः पुरोडाशप्रणाल्या यागानुष्ठाने एव अपूर्वं नान्यथा इति । अतश्च अप्राप्तांशपूरणमेव नियमविधौ वाक्यार्थः ।

### 4.1.2.3.परिसंख्याविधिः

उभयोश्च युगपत्प्राप्तावितरनिवृत्तिपरो विधिः परिसंख्याविधिः । यथा पञ्च पञ्चनखा भक्ष्याः इति पञ्चनखविशिष्टपञ्चप्राणिनां भक्षणस्य तदितरप्राणिनां भक्षणस्य (रागतः) युगपत्प्राप्तौ इतरनिवृत्तिपरः पञ्चातिरिक्तप्राणिनां भक्षण निवृत्तिपरः विधिः परिसंख्याविधिः ।

इयं परिसंख्या द्विविधा श्रौतीपरिसंख्या लाक्षणिकी परिसंख्या चेति । यत्र वाक्ये इतरनिवृत्तिबोधकं पदं श्रूयते सा श्रौती परिसंख्या ।

उभयोश्च युगपत्प्राप्तावितरनिवृत्तिपरो विधिः परिसंख्याविधिः।

यथा अत्र ह्येवावपन्ति इति । अत्र एवकारेण इतरनिवृत्तिः बोध्यते । यत्र तु इतरनिवृत्तिबोधकं पदं न श्रूयते । तत्र लाक्षणिकी परिसंख्या । तत्र त्रैदोष्यं संभवति । श्रुतहानिः, अश्रुतकल्पना, प्राप्तबाधश्चेति । प्रकृते श्रुतस्य पञ्चनखभक्षणस्य हानात् । अश्रुतस्य पञ्चातिरिक्तपञ्चनखभक्षणस्य कल्पनात् । प्राप्तस्य रागतः प्राप्तस्य इतरप्राणिभक्षणस्य वाधात् इति । तदुक्तं –

श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनात् ।

प्राप्तस्य बाधादित्येवं परिसंख्या त्रिधा मता॥ इति ।

अयं दोषद्वयं शब्दनिष्ठम् । प्राप्तबाधस्तु वार्षिकः अर्थनिष्ठः। एषां मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वं नास्ति तेषाम् उच्चारणमापमदृष्टार्थमिति अनन्यगत्या कल्प्यत इति न मन्त्राणामानर्थक्यम्।

## Summarised Overview

प्रयोगसमवेतार्थस्मारकत्वं मन्त्रत्वम् । तेषां कर्मसम्वेतार्थस्मारकत्वेन अर्थत्वम् । न तु तदुच्चारणमात्रेण अदृष्टं लभ्यते । भट्टपादैः विधिः त्रिधा विभक्तः । अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति ।उभयोश्च युगपत्प्राप्ताावितरनिवृत्तिपरो विधिः परिसंख्याविधिः । केनापि प्रमाणेन अज्ञातर्थबोधकः विधिः अपूर्वविधिः । पक्षे अप्राप्तांशपूरकः विधिः नियमविधिः ।

## Assignments

1.अर्थसंग्रहानुसारं मन्त्रं निरूपयत।

2.भट्टपादानुसारं अपूर्वविधिं निरूपयत।

3.भट्टपादानुसारं नियमविधिं निरूपयत।

4.भट्टपादानुसारं परिसंख्याविधिं निरूपयत।

5.परिसंख्याविधिं विचारयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

# References

1. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

2. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# नामधेयः

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहप्रतिपादकनामधेयस्य ज्ञानं लभते।

## Background

मीमांसादर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। मीमांसादर्शनस्य प्रकरणग्रन्थः भवति लौगाक्षिभास्करस्य अर्थसंग्रहः। अर्थसंग्रहे मन्त्रस्वरूपमुक्त्वा नामधेयस्य विचारः क्रियते।अस्मिन् एकके नामधेयं अधिकृत्य पठामः

## Keywords

विधेयार्थपरिच्छेदकतया अर्थवत्वम्, मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्य-शास्त्रात्, तद्व्यपदेशात् ।

## Discussion

**4.2.1.नामधेयः**

मन्त्रात्मकस्य वेदभागस्य यथायथं प्रयोजनवत्वमुपपाद्य क्रमप्राप्तं नामधेयानां प्रयोजनवत्वं उपपादयति । नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्वम् । "उद्भिदा यजेत पशुकामः" इत्यत्र उद्भिच्छब्दः कर्मनामधेयम् । तेन विधेयस्य यागविशेषस्य अर्थपरिच्छेदः इतरयागापेक्षया व्यावृत्तिः क्रियते ।

नामधेयानां विधेयार्थपरिच्छेदक तया अर्थवत्वम्।

अनेन वाक्येन प्रमाणान्तरेणाप्राप्तत्वात् पशुरूपफलोद्देशेन यागः विधीयते । कोऽसौ याग इति यागविशेषापेक्षायां उद्भिच्छब्दात् उद्भिन्नामक याग ज्ञायते । उद्भिदा यागेन पशुं भावयेत् इत्यत्र धात्वर्थसामानाधिकरण्येन नामधेयान्वयः ।

नामधेयत्वाङ्गीकारे निमित्तचतुष्टयम् ।

तच्च - मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्चेति ।

**4.2.1.1.मत्वर्थलक्षणाप्रसङ्गरूपं निमित्तम्**

"उद्भिदा यजेत पशुकाम" इत्यत्र उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्यप्राप्तत्वात् गुणविशिष्टकर्मविधानं वक्तव्यम् । तदा च मत्वर्थलक्षणा अनिवार्या ।

अत्र गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यात् न निर्णय इति चेत् नामाधिकरण्यस्य निर्णायकत्वात्।

उद्भिन्नामकेन यागेन पशुफलं भावयेत् इत्युक्ते सामानाधिकरण्यं लभ्यते । गुणविधित्वपक्षे "उद्भिद्यते विदार्यते" भूमिरनेन इति उद्भिच्छब्दः खनित्ररूपसाधनवाचकः । एवञ्च खनित्रेण साध्यो यो यागः तेन पशुं भावयेत् इति वैयधिकरण्यं स्यात् ।

अनेन वाक्येन ज्योतिष्टोमे खनित्ररूपो गुणो विधातुं न शक्यते । तस्य सोमेन यजेत इति उत्पत्तिशिष्ट सोमद्रव्यावरुद्धत्वात् । यदि गुणविधिः स्यात् कर्मणः अपि अप्राप्तत्वेन अनेन गुणविशिष्टं कर्म विधीयते इति वक्तव्यम् । अन्यथा वाक्यभेदप्रसङ्गः ।

गुणविधित्वे मत्वर्थलक्षणा । उद्भिद्वता यागेन पशुं भावयेत् इति वाक्यार्थः ।

### 4.2.1.2.वाक्यभेदप्रसङ्गात् कर्मनामधेयत्वम्

"चित्रया यजेत पशुकामः" इत्यत्र चित्राशब्दस्य कर्मनामत्वं वाक्यभेदभयात् । अनेन गुणविशिष्टयागविधानं न संभवति । दधिमधुघृतंपयोधाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम् इत्यनेन गुणस्य प्राप्तत्वात् । उत्पत्तिवाक्ये गुणस्य प्राप्तत्वात् न गुणान्तरं विधातुं शक्यते । यागस्य गुणेन फलेन च साकं संबन्धे विध्यावृत्तिलक्षणो वाक्यभेदः । तस्मात् चित्रापदं कर्मनामधेयम्। चित्रापदस्य धात्वर्थे सामानाधिकरण्येन अन्वयः । चित्रानामकयागेन पशुं भावयेत् इति बोधः ।

उत्पत्तिवाक्ये गुणस्य प्राप्तत्वात् न गुणान्तरं विधातुं शक्यते।

दध्यादि अनेक द्रव्यसाध्यत्वेन चित्राशब्दस्यात्र प्रवृत्तिः सङ्गच्छते ।

### 4.2.1.3.तत्प्रख्यशास्त्ररूपं निमित्तम्

अग्निहोत्रं जुहोतीत्यत्र अग्निहोत्रशब्दस्य कर्मनामत्वं तत्प्रख्यशास्त्रात् । तस्य विधिस्तस्य, गुणस्य, प्रख्यस्य प्रख्यापकस्य प्रापकस्य शास्त्रान्तरस्य विद्यमानत्वात् । इति यावत् । "तत्प्रख्यं चान्यशास्त्रम्" इति जैमिनिसूत्रम् ।

ननु गुणविधिर्भवतु अग्निहोत्रपदमिति । तथाहि अग्नौ होत्रं होमः इति सप्तमी समासमङ्गीकृत्य होमाधाररूपः अग्निः अनेन विधीयते इत्युच्यते- यदाहवनीये जुहोति इत्यनेन प्राप्तत्वात् न पुनः आचारविधानम् । तर्हि अग्नये होत्रं होमः इति चतुर्थी समासमङ्गीकृत्य अग्निरूपः देवतागुणः विधीयते इत्युच्यते मन्त्रवर्णेनैव देवतायाः प्राप्तत्वात् न पुनर्विधानं संभवति । -

अत्र गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यात् न निर्णय इति चेत् सामानाधिकरण्यस्य निर्णायकत्वात् ।

अत्र च "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा इति सायं जुहोति" इत्यनेन प्राप्तमग्निम् अनूद्य - "यदग्नये च प्रजापतये च सायं जुहोति" इत्यनेन अग्निसमुच्चितप्रजापति विधानम् । एवमेव "सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा" इत्यनेन प्राप्तसूर्यदेवतामनूद्य

यत्सूर्याय च प्रजापतये च प्राप्तः इति तत्समुच्चितप्रजापतिविधानम्।

#### 4.2.1.4.तद्व्यपदेशेन कर्मनामधेयत्वम्

"श्येनेनाभिचरन् यजेत" इत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात् । तेन व्यपदेशात् उपमानात् तदन्यथानुपपत्या श्येनशब्दः कर्मनामधेयमिति यावत् । "तद्व्यपदेशाच्च" इति जैमिनिसूत्रम्। यद्विधेयं तस्य स्तुतिर्भवति। यद्यत्र श्येनो विधेयः तदा अर्थवादेन तस्यैव स्तुतिः कार्या । अत्र "यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यमादत्ते" इति अनेन श्येनः स्तोतुं न शक्यते।

यदा तु श्येनसंज्ञको यागः विधीयते तदा अर्थवादेन श्येनपक्षिणः उपमानेन तस्य स्तुतिः कर्तुं शक्यते इति श्येनशब्दः कर्मनामधेयं तद्व्यपदेशात्।

उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेयनिमित्तमिति केचन अभिप्रयन्ति । किन्तु तस्य तत्प्रख्यशास्त्रादेव गतार्थत्वेन अतिरिक्तनिमित्तत्वकल्पनं न संभवति।

## Summarised Overview

मन्त्रात्मकस्य वेदभागस्य यथायथं प्रयोजनवत्वमुपपाद्य क्रमप्राप्तं नामधेयानां प्रयोजनवत्वं उपपादयति । नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्वम् । नामधेयत्वाङ्गीकारे निमित्तचतुष्टयम् ।तच्च - मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्चेति।

## Assignments

1.अर्थसंग्रहानुसारं नामधेयं विचारयत।

2.नामधेयत्वाङ्गीकारे निमित्तचतुष्टयम् अधिकृत्य विचारयत।

3. मत्वर्थलक्षणाभयात् – विशदयत।

4.वाक्यभेदभयात् – विशदयत।

5.तत्प्रख्यशास्त्रात् – विशदयत।

6.तद्व्यपदेशाच्चेति – विशदयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.


## References


**1.**Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

**2.**Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.


SGOU

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# निषेधः

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहे प्रतिपादितस्य निषेधविषयस्य ज्ञानं लभते।

## Background

मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। मीमांसादर्शनस्य प्रकरणग्रन्थः भवति लौगाक्षिभास्करस्य अर्थसंग्रहः। अर्थसंग्रहे नामधेयस्य स्वरूपमुक्त्वा निषेधमधिकृत्य विचारः क्रियते।अस्मिन् एकके निषेधं अधिकृत्य पठामः।

## Keywords

पुरुषनिवर्तकं वाक्यम्, न कलञ्जं भक्षयेत्, अव्यवधानं, लिङ्त्वांशं, नञर्थम्, निषेधवाक्यम्, कर्तव्यार्थानवबोधनात्, पर्युदासः, प्रतिष्ठाफलं।

## Discussion

### 4.3.1.निषेधमीमांसा -

मत्वर्थलक्षणादिनिमित्तचतुष्टयनिरूपणेन नामधेयस्य विधेयार्थपरिच्छेदकतया अर्थवत्वं निरूप्य वेदस्य पञ्चमविभागस्य निषेधाख्यस्य अर्थवत्वनिरूपणाय निषेधानां लक्षणं स्वरूपं तेषां निवर्तनावबोधकत्वं पुरुषार्थानुबन्धित्वं च बोधयितुमुपक्रमते ।

" निषेधो नाम - पुरुषस्य निवर्तकं वाक्यम् " ।

निषेधः-पुरुषस्य निवर्तकं वाक्यम्।

निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैव अर्थवत्वम् । "न कलञ्जं भक्षयेत्" इत्यादि निषेधवाक्यानाम् अनर्थहेतुभूतकलञ्जभक्षणादिक्रियायाः सकाशात् पुरुषस्य निवृत्तिजनकत्वेनैव अर्थवत्वम् । न तु अत्र किञ्चित्कर्तव्यताप्रतिपादकत्वेन । यथा "अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादिविधिः प्रवर्तनां प्रतिपादयति स्वर्गप्रवर्तकत्वनिर्वाहार्थं यागादेः स्वर्गादि इष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति । यगादौ इष्टसाधनताज्ञानजननद्वारा 'यजेत' इत्यादौ विधिः पुरुषं तत्र प्रवर्तयति । तथा "न कलञ्जं भक्षयेत्" इत्यादि निषेधोऽपि निवर्तनां प्रतिपादयन् स्वविधिविधेयनिवर्तनायाः निवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणादेः परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततः निवर्तयति ।

### 4.2.2.निषेधवाक्यानां निवर्तनाप्रतिपादकत्वम्

निषेधवाक्यानि कथं निवर्तनां प्रतिपादयन्ति इति चेत् 'न कलञ्जं भक्षयेत्' इत्यत्र अव्यवधानेन नञर्थस्याभावस्य धात्वर्थेनान्वये धात्वर्थवर्जनकर्तव्यता एव वाक्यार्थत्वेन प्रतीयते। यथा 'यजेत' इत्यादौ यागकर्तव्यता वक्यार्थः तथा निषेधेषु तत्तद्धात्वर्थवर्जनकर्तव्यता वाक्यार्थं न तु निवर्तना इति चेत् न तावदत्र धात्वर्थस्य नञर्थेन अन्वयः । व्यवधानेऽपि नञर्थस्य पार्श्वस्थितं धात्वर्थं परित्यज्य प्रत्ययार्थे भावानायामेव अन्वयः ।

"न ह्यन्योपसर्जनत्वेनोपस्थितमन्यात्रान्वेति" अन्यथा "राजपुरुषमानय" इत्यादौ अन्यत्र पुरुषपदार्थे उपसर्जनत्वेनान्वितस्य अन्यत्र प्रधानानयनक्रियायामन्वयः स्यात् । अतः प्रत्ययार्थे एव नञर्थस्यान्वयः । धात्वर्थस्य प्रत्ययार्थभावनायामुपसर्जनत्वेनान्वयात् । तत्रापि आख्यातप्रत्ययेनार्थभावना बोध्यते । लिङ्त्वांशेन शब्दभावना बोध्यते । तत्र कस्यां भावनायामिति जिज्ञासायां आख्यातार्थार्थिभवनायाः लिङर्थप्रवर्तनाय उपसर्जनत्वेन (साध्यत्वेनान्वयात्) अन्वयात् सर्वापेक्षायां प्रधानभूतायां शब्दभावनायामेव नञर्थस्याभावस्य उपसर्जनत्वेनान्वयः

शब्दभावनारूपस्य प्रवर्तनाविशेषस्य लिङ्प्रत्ययार्थस्य नञर्थाभावेनान्वये सिद्धे नञः प्रत्ययार्थभूतप्रवर्तनाविरोधिनिवर्तनाबोधकत्वप्रदर्शनार्थं प्रथमं नञः स्वभावः प्रदर्श्यते ।

नञः एषः स्वभावः यत् स्वसमभिव्याहृत पदबोध्यार्थप्रतियोगिकाभावबोधकत्वम् । यथा घटो नास्तीत्यादौ अस्तीति शब्दसमभिव्याहृतो नञ्, घटसत्वविरोधि घटासत्वं बोधयति।

लिङ्समभिव्याहृते नञ् लिङर्थप्रवर्तनविरोधिनीं निवर्तनामेव बोधयति।

एवं लिङ्समभिव्याहृतो नञ् लिङर्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति । विधिवाक्यश्रवणे अयं मां प्रवर्तयतीति नियमेन प्रतीतिर्जायते । तत्र प्रमाणं "विधिनिमन्त्रणामन्त्रणाभीष्टसम्प्रश्नप्रार्थनेषु लिङ्" इति पाणिन्यनुशासनमेव । तद्वत् निषेधवाक्यश्रवणे च अयं मां निवर्तयतीति नियमेन प्रतीतिर्जायते । तस्मात् न कलञ्जं भक्षयेत् इत्यादि निषेधवाक्यस्थले "कलञ्जकर्मकभक्षणककरणिका कृतिः निवर्तनाविषयः" इति ।

एवं सर्वत्र निषेधवाक्येषु निवर्तनाया एव वाक्यार्थत्वे विधिनिषेधयोर्भिन्नार्थत्वमप्युपपन्नं भवति । हननादि वर्जनकर्तव्यतावाक्यार्थः निषेधवाक्येषु इति पक्षे तु कर्तव्यतायाः उभयत्र प्रतिपाद्यत्वात् तयोरेकार्थत्वं स्यात् । तन्नयुक्तम् ।

तदुक्तं भट्टपादैः - अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः। दृश्यते तादृगेवेह विधानप्रतिषेधयोः । इति । तस्मात् निषेधस्थले निवर्तनैव वक्यार्थः।

यदा तु नञर्थस्य अभावस्य प्रत्ययार्थप्रवर्तनायामन्वये किञ्चिद्बाधकं वर्तते तदा नञर्थस्य धात्वर्थे एव अन्वयः।

## Summarised Overview

अस्मिन् एकके निषेधस्य विचारः विस्तरेण प्रतिपादितः। निषेधो नाम - पुरुषस्य निवर्तकं वाक्यम् " । निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैव अर्थवत्वम् । "न कलञ्जं भक्षयेत्" इत्यादि निषेधवाक्यानाम् अनर्थहेतुभूतकलञ्जभक्षणादिक्रियायाः सकाशात् पुरुषस्य निवृत्तिजनकत्वेनैव अर्थवत्वम् । यत्र प्रतिषेधस्य विकल्पापादकत्वं तत्रैकस्य प्रतिषेधेऽपि न प्रतिषिध्यमानस्य अनर्थहेतुत्वम्।

## Assignments

1.अर्थसंग्रहानुसारं निषेधमधिकृत्य विचारयत।
2.निषेधवाक्यानां प्रयोजनं सविस्तरं प्रतिपादयत।

## Suggested Readings


1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady

# References

**1.**Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

**2.**Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# अर्थवादः

## Learning Outcomes

- भारतीयदर्शनानां परिचयं प्राप्नोति।
- मीमांसातत्त्वानि अवगच्छति।
- जीवने दार्शनिकज्ञानं लभते।
- अर्थसंग्रहस्य अवबोधनम्।

## Background

मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी।मीमांसादर्शनस्य प्रकरणग्रन्थः भवति लौगाक्षिभास्करस्य अर्थसंग्रहः। अर्थसंग्रहे नामधेयस्य स्वरूपमुक्त्वा अर्थवादमधिकृत्य विचारः क्रियते।अस्मिन् एकके अर्थवादं अधिकृत्य पठामः।

## Keywords

प्राशस्त्यनिन्दान्यतरप्रतिपादकं वेदवाक्यम्, विधिशेषः, निषेधशेषः, निन्दाबोधकत्वम्, धर्मप्रामाण्यम्, गुणवादः, अनुवादः, भूतार्थवादः।

# Discussion

### 4.4.1.अर्थवादः

सर्वार्थवादसाधारण्येन अर्थवादस्य लक्षणं निरूप्यते प्राशस्त्यनिन्दान्यतरप्रतिपादकं वेदवाक्यमिति। अर्थवादस्य लक्षणया प्राशस्त्यनिन्दान्यतरप्रतिपादकत्वेन इदं लक्षणं सङ्गच्छते।

अर्थवादवाक्यानां यथाश्रुतार्थप्रतिपादने प्रयोजनाभावात् विधेययागादेः अप्राशस्त्यं च लक्षणया प्रतिपादयन्तीति अङ्गीक्रियते । स्वार्थमात्रपरत्वे सदसद्रूपसिद्धार्थबोधकत्वेन आनर्थक्यं स्यात् । एवं स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना बोधितस्य सकलस्य वेदस्य प्रयोजनवदर्थबोधकत्वरूप-सिद्धान्तस्य भङ्गापत्तिश्च।

प्राशस्त्यनिन्दान्यत-रप्रतिपादकं वेदवाक्यम् अर्थवादः।

अर्थवादविभागः स च अर्थवादः द्विविधः विधिशेषः निषेधशेषश्चेति । वायव्यं श्वेतमालभेत भूतिकामः इत्यादि विधिसन्निधौ श्रूयमाणाः वायुर्वै क्षेपिष्ठा देवता इत्यादयः। अस्य प्राशस्त्यरूपस्य विधिशेषरूपस्य अर्थवादस्य विधेयवायव्ययागस्य प्राशस्त्यबोधकतया अर्थवत्वम्।

एवं "बर्हिषि रजतं न देयम्" इत्यादिनिषेधशेषस्य "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" इत्याद्यर्थवादस्य निषेध्यरजतदानस्य निन्दाबोधकत्वेन अर्थवत्वम् । एतादृश प्राशस्त्याप्राशस्त्यबोधक अर्थवादयोः क्रमेण विधिनिषेधवाक्याभ्याम् एकवाक्यत्वमङ्गीकृत्य धर्मप्रामाण्यं प्रतिपादितम् । आलस्यादिवशात् अप्रवर्तमानस्य पुरुषस्य यागादौ रुच्युत्पादनद्वारा विध्यर्थवादानां प्रामाण्यम् । निषेधशेषाणां तु निषेध्य कलञ्जभक्षणादेः यागे रजतदानादौ च रागतः प्रवर्तमानपुरुषस्य अरुच्युत्पादनद्वारा निषेधवाक्येन सह एकवाक्यत्वमङ्गीकृत्य प्रामाण्यम्

स चायमर्थवादः पुनः प्रकान्तरेण त्रिविधः। गुणवादः, अनुवादः, भूतार्थवादश्चेति।

**विरोधे गुणवादस्स्यादनुवादोऽवधारिते।**
**भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥** इति

प्रमाणान्तरविरोधे सति अर्थवादः गुणवादः। यथा "आदित्यो यूपः" इत्यादि ।

यूपादित्याभेदस्य प्रत्यक्षतः बाधितत्वेन आदित्यवत् उज्वलत्वरूपगुणः अनेन लक्षणया प्रतिपाद्यते । प्रमाणान्तरावगतार्थबोधकार्थवादः - अनुवादः। यथा अग्निर्हिमस्य भेषजमिति । अत्र हिमविरोधित्वमग्नौ प्रत्यक्षसिद्धम् । प्रमाणान्तरविरोधप्रमाणान्तरप्राप्तिरहितः अर्थवादः भूतार्थवादः। यथा इन्द्रो वृत्राय वज्रमुदयच्छत् इति ।

प्रमाणान्तरविरोधप्रमाणान्तरप्राप्तिरहितः अर्थवादः भूतार्थवादः

एवञ्च विध्यर्थवादादिरूपस्य पञ्चधा विभक्तस्य सर्वस्यापि वेदस्य साक्षात्परम्परया वा यागादिधर्मप्रतिपादकत्वेन प्रामाण्यं सिद्धम्। सोऽयं धर्मः यदुद्देश्येन विहितः तत्फलहेतुः । ईश्वरापर्णबुध्या क्रियमाणस्तु पापक्षयद्वारा - चित्तशुद्धिद्वारा वा मोक्षहेतुः । तत्र यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् इति गीतावाक्यरूपस्मृतिः प्रमाणम् । स्मृतेस्तु श्रुतिमूलकतया प्रामाण्यं सिद्धान्तितम् ।

## Summarised Overview

अस्मिन् एकके अर्थवादस्य विचारः कृतः। प्राशस्त्यनिन्दान्यतरप्रतिपादकं वेदवाक्यमिति। अर्थवादस्य लक्षणया प्राशस्त्यनिन्दान्यतरप्रतिपादकत्वेन इदं लक्षणं सङ्गच्छते । अर्थवादः द्विविधः विधिशेषः निषेधशेषश्चेति । स चायमर्थवादः पुनः प्रकान्तरेण त्रिविधः। गुणवादः, अनुवादः, भूतार्थवादश्चेति । प्रमाणान्तरविरोधे सति अर्थवादः गुणवादः। प्रमाणान्तरावगतार्थबोधकार्थवादः अनुवादः । प्रमाणान्तरविरोधप्रमाणान्तरप्राप्तिरहितः अर्थवादः भूतार्थवादः।

## Assignments

1. अर्थवादमधिकृत्य विशदयत।
2. अर्थवादस्य भेदान् विशदयत।
3. प्रमाणेषु अर्थवादस्य प्राधान्यं प्रति विचारयत।

## Suggested Readings

1. Arthsangraha, Sanskrit Commentaries of Parmahamasa Rameshwar Shiv Yogi and Hindi commentary of Dr.Kamleshwar Nath Mishra, Published by Chawkhamba Surbharti Prakashan, Varanasi.
2. Arthsangraha Sanskrit Commentary of Narayana Ram Acharya , Published by Chawkhamba Sanskrit Series, Varansi.
3. Arthasangraha, The Kaumudi of Rameshwar Bhikshu , Bharatiya Vidhya Prakashan, Varanasi.
4. Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.
5. Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

## References

**1.**Arthsangraha of Dr. J. Dheebo with English commentary, Chawkhamba Amarbharati Prakashan, Varanasi.

**2.**Arthsangraha, Malayalam Translation- Dr.T.Aryadevi, Nalanda Publications, Kalady.

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO**.................... **QP CODE..................**

**Name**........................

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 10 - M23SN10DC- वेदान्तः मीमांसा च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

---

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

**(प्रथमो भागः)**

**I.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. वेदान्तो नाम किम् ?
2. विज्ञानवादी बौद्धः आत्मनः विषये किं कथयन्ति ?
3. वेदान्तसारस्य संबन्धविषयप्रयोजनानि कानि ?
4. शमादिषड्कसम्पत्तिं विशदयत।
5. अर्थसंग्रहस्य रचयिता कः? तत्र प्रतिपाद्यमानः विषयः कः ?
6. भावना नाम का ?
7. प्रयोगविधिं विशदयत ।
8. अर्थवादं विशदयत।

SGOU

## SECTION –B
(द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x5=30)**

**(Answer any six Questions in a page)**

9. अज्ञानं नाम किम्? तस्य शक्तिद्वयञ्च विशदयत।
10. अधिकारीलक्षणं विशदयत।
11. वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः।
    कुरुते जैमिनिनय प्रवेशायार्थसंग्रहम्।। आशयं विशदयत।
12. स्थूलप्रपञ्चोत्पत्तिं विशदयत।
13. पुत्रादीनां आत्मत्वं प्रतिपादयत।
14. तत्त्वमसि महावाक्यं संबन्धत्रयेण निरूपयत।
15. नामधेयत्वाङ्गीकारे निमित्तचतुष्टयमधिकृत्य विचारयत।
16. जिज्ञासामधिकृत्य निरूपयत।
17. उत्पत्तिविधिं विशदयत।
18. आर्थीभावनामधिकृत्य विचारयत।

## SECTION – C
(तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. वेदान्तसारानुसारं साधनचतुष्टयं उपन्यस्यत ।
20. जीवन्मुक्तस्वरूपं वेदान्तसारदिशा निरूपयत।
21. अथातो धर्मजिज्ञासा इति सूत्रं अर्थसंग्रहानुसारं विशदयत।
22. निषेधवाक्यानां प्रयोजनं सविस्तरं प्रतिपादयत।

SGOU

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO**.................... **QP CODE..................**

**Name**........................

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 10 - M23SN10DC- वेदान्तः मीमांसा च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

**(प्रथमो भागः)**

**IV.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5 x 2=10)**
**(Answer any five Questions in a Paragraph)**

1. उपनिषत् इति पदस्य अर्थविचारं कुरुत।
2. अपवादो नाम किम् ?
3. परिणामविवर्तौ विशदयत।
4. षड्विधलिङ्गानि कानि ?
5. नियमविधिं प्रतिपादयत।
6. अर्थसंग्रहस्य मङ्गलश्लोकमधिकृत्य विशदयत।
7. शाब्दीभावना का ?
8. मन्त्रो नाम किम् ?

## SECTION –B

(द्वितीयो भागः)

V. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। (6 x5=30)

**(Answer any six Questions in a page)**

9. षड्लिङ्गानि कानि ? कथञ्च तानि वेदान्तनाम् अद्वयब्रह्मपरत्वं प्राप्तुं सहायकानि भवन्ति ?
10. पञ्चीकरणप्रकारं निरूपयत।
11. पुत्रादीनां अनात्मत्वं वेदान्तसारानुसारं स्थापयत।
12. सविकल्पकसमाधिं विशदयत।`1
13. तत्तमसि इति महावाक्यं जहदजहल्लक्षणया स्थापयत।
14. द्वादशिलक्षण्यां प्रतिपादितं विषयं किम् ?
15. शाब्दीभावनां निरूपयत।
16. अर्थवादं सभेदं प्रतिपादयत।
17. यजेत इति पदं अर्थसंग्रहरीत्या विशदयत।
18. परिसंख्याविधिं विशदयत।

## SECTION – C

(तृतीयो भागः)

VI. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)

**(Write an essay on any two of the following)**

19. वेदान्तसारानुसारं सूक्ष्मशरीरं उपन्यस्यत।
20. वेदान्तसारानुसारं निर्विकल्पकसमाधिं उपन्यस्यत।
21. चतुर्विधविधयः सभेदं विचारयत।
22. वेदप्रतिपादितं धर्मस्वरूपं उपन्यस्यत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

वेदान्तः मिमांसा च

COURSE CODE: M23SN10DC

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-986822-4-6
9 788198 682246